संस्कृत अकाडमी ग्रन्थमाला - 118

In Public domain, Digitization Muthulakshmi Research Academy

उदाहरणकाव्यसङ्ग्रहः

UDĀHARAṆAKĀVYASAṄGRAHAḤ

प्रधानसम्पादकः
आचार्य के. नीलकण्ठम्
निदेशकः

सम्पादकः
डा. सन्तोषकुमारः जोषी
सहायसंशोधकः

संस्कृत अकाडमी
(केन्द्रीय संस्कृत विश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्वविद्यालयः
हैदराबाद्
2022

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला –118

उदाहरणकाव्यसङ्ग्रहः

प्रधानसम्पादकः

आचार्य के.नीलकण्ठम्

निदेशकः

सम्पादकः

डा.सन्तोषकुमारः जोषी

सहायसंशोधकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः

हैदराबाद्

2022

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला –118

उदाहरणकाव्यसङ्ग्रहः

ISBN– 978–93–80171–63–0

प्रथममुद्रणम् – 2022
मुद्रितप्रतयः – 200
पृष्टसंख्या – IX + 98
मूल्यम् – 200
सर्वाधिकाराः – संस्कृतपरिषदायत्ताः

प्रप्तिस्थानम्
निदेशकः
संस्कृत अकाडमी
(केन्दीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्र्वविद्यालयः,
हैदराबाद् 50007
दूरवाणी – 040 27070281

Printed at:
Bhandari Arts 'N' Printers,
Hyderabad.

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series -118

UDĀHARAṆAKĀVYASAṄGRAHAḤ

Chief Editor
Prof K. Neelakantham
Director

Editor
Dr. Joshi Santosh kumar
Research Assistant

SANSKRIT ACADEMY
Adarsha Shodha Sanstha
(Recognised by Central Sanskrit University, New Delhi)
Osmania University Campus,
Hyderabad – 500 007
2022

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 118

UDĀHARAṆAKĀVYASAṄGRAHAḤ

ISBN – 978-93-80171-63-0

First Edition-2022

Copies – 200

Pages –IX +98

Price- 200

© Sanskrit Academy

Copies can be had from-

DIRECTOR
SANSKRIT ACADEMY
(Adarsha Shodha Samstha)
Osmania University, Hyderabad-07
Phone&Fax: 040-27070281
Website: www.sanskritacademy.ac.in
Email: sanskritcademyhyde@gmail.com

Printed at:
Bhandari Arts 'N' Printers,
Hyderabad.

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूची

Preface – Prof K. Neelakantham I–II

प्रस्तावना – डा. जोषि. सन्तोषकुमारः III–IX

1. पाल्कुरिकि सोमनाथकविविरचितं **बसवोदाहरणम्** 1–11

2. **रङ्गेशोदाहरणम्** –(अज्ञातकविकर्तृकम) 12–21

3. ओरुगण्टि रामयामात्यकविविरचितं **शिवोदाहरणम्** 22–31

4. तिरुमलाचार्यकविविरचितं **चिक्कदेवरायोदाहरणम्** 32–40

5. कालीपट्नपु सिद्धरामकविविरचितं **मल्लिकार्जुनस्तवोदाहरणम्** 41–50

6. श्रीभाष्यं विजयसारथिमहाकविविरचितम् उदाहरणचतुष्टयम् 51–92

6.1.**श्रीरामोदाहरणम्** 53–62

6.2.**श्रीवेङ्कटेश्वरोदाहरणम्** 63–72

6.3. **श्रीरामानुजोदाहरणम्** 73–82

6.4.**श्रीरघुनाथदेशिकोदाहरणम्** 83–92

7. उदाहरणकाव्यलक्षणानि 93–98

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्री शङ्करभगवत्पादाः विजयन्ते।।

We are very happy to bring out the book titled ***Udaaharanakavyasangraha*** which consists of nine ***udaaharanakavyas*** composed by different poets. Though the definition for such kavya was not defined by earlier aestheticians of Sanskrit Sahityashastra later authors like Amritanandayogiin ***Kaavyaalankaara sangraha*** and VIdyanathain ***Prataaparudreeyam*** have mentioned it while defining all other Kavyas.While the first one has given its definition under the ***Chaatu- prabandhas***, Vidyanatha had it under the title of ***kshudraprabandhas***. Apart from these two; some other books on Sanskrit poetics like ***Sahityakalpadruma, Padaarthadeepika, Alankarashiro-bhushanam, Prabandhadeepika*** have a mention of definitions of the ***Udaharanakaavya.*** Dr. Joshi Santosh Kumar has given the definitions of this ***Udaaharanakaavya*** in his Prastaavana of this book in detail.

According to Sri Venkat Rao Nidadavolu who published a book on ***Udaaharana kavyas*** in Telugu, the well-known Telugu author ***Palkuriki Somanatha*** of 1160-1240 A. D. composed a Udaaharana kaavya in Telugu for first time and on the basis of this only the aestheticians like ***Amritaanandayogi*** of 12th century A.D. and ***Vidyanatha*** of 13 century A. D started to refer and define this Kavya in their books. And all the nine kavyaas which are published in this book of Sanskrit Academy have been composed only after the 12th century A.D.

In Public domain. Digitization Muthulakshmi Research Academy

Though this Udaaharanakaavya is short in length, an author needs a very good talent of composing poems along with command over rasa, riti, vritti, alankara, chandas, grammar and complete authority on language.

I congratulate and appreciate the efforts of Dr. Joshi Santosh Kumar research assistant who made a thorough study on these kaavyaas published in telugu script previously and made a copy ready for publication in Devanagari script. I thank my two amicable deputy directors Dr. V. Subrahamanyam and Dr. K. Varalakshmi who are ever ready to take any assignment with full confidence. I do not forget the assistance of my sincere and senior research assistant Sri K.V. Suryaprakash and other office staff.

My sincere thanks to Prof. Srinivasa Varkhedi Honourable Vice-chancellor and Prof. Ranjit kumar Barman, Registrar I/c, Central Sanskrit University, New Delhi for their kind help and encouragement in research and publications of Sanskrit Academy and It is a great pleasure to acknowledge the motivation of Prof. D. Ravinder, Honourable Vice-chancellor and Prof. P. Lakshminarayana Registrar Osmania University in the publications of Sanskrit Academy.

Director

Prof. K. Neelakantham

In Public domain. Digitization Muthulakshmi Research Academy

उदाहरणकाव्यसङ्ग्रहः

प्रस्तावना

वाङ्मयं द्विविधं शास्त्रं काव्यञ्चेति। तत्र शास्त्रं पुनः प्रज्ञोत्पाद्यमिति, काव्यं प्रतिभाप्रसूतमिति तपोनिधयः शास्त्रकाराः काव्यशास्त्रप्रणेतारश्च प्रणिजगदुः। प्राचीनकालादारभ्य नैके शास्त्रपण्डिताः विविधान् शास्त्रग्रन्थान् विरच्यैकत्र शास्त्रवाङ्मयं वर्धयामासुः अन्यत्र च भासकालिदासादिमहाकवयः नैकविधान् काव्यग्रन्थान् प्रणीय लौकिकवाङ्मयस्य वैशाल्यं प्राशस्त्यं च वर्धयित्वा सहृदयचेतांसि रञ्जयामासुः।

काव्यशास्त्रप्रणेतारः काव्यस्यानेकविधत्वम् प्रतिपादयामासुः। आदौ तावत् श्रव्यं दृश्यं चेति द्विधा विभज्य तत्राद्यस्य श्रव्यकाव्यस्य रचनप्रक्रियामाधारीकृत्य पद्यम् गद्यम् चम्पू चेति, तत्रापि पुनः वृत्त-नायक-सर्गादिविषयानाधारीकृत्य महाकाव्य लघुकाव्य खण्डकाव्यादिरूपेण नैकविधं भवितुमर्हतीति स्पष्टीचक्रुः अपि च लक्षणोदाहरणाभ्यां सह तानि स्वग्रन्थेषु व्यवृण्वन्। किन्त्विदानीम् उदाहरणकाव्यग्रन्थानां संशोधनेनेदमवगम्यते यत् लघुकाव्यानां लक्षणानि क्षुद्रप्रबन्धाः इति नाम्ना सर्वप्रथमम् अमृतानन्दयोगी स्वकाव्यालङ्कारसङ्ग्रहे, एवं विद्यानाथः स्वप्रतापरुद्रीयग्रन्थे च प्रतिपादितवन्ताविति क्षुद्रप्रबन्धेष्वन्यतमत्वेन उदाहरण- काव्यस्यापि लक्षणानि तत्र विशेषतया प्रस्ताविष्टामिति चावगम्यते।

उदाहरणकाव्यलक्षणानि

अलङ्कारसङ्ग्रहे एकादशपरिच्छेदे चाटुप्रबन्धलक्षणनिरूपणप्रसङ्गे उदाहरणकाव्यस्य लक्षणानि सविस्तरं प्रास्तावीत् अमृतानन्दयोगी। अपि च प्रतापरुद्रीयस्य काव्यप्रकरणे, साहित्यकल्पद्रुमे, पदार्थदीपिकायां, अलङ्कारशिरोभूषणे, प्रबन्धदीपिकायां चोदाहरणस्य लक्षणानि प्रत्यपादयन्निति लाक्षणिकाः इत्यवगम्यते। तेषां समेषाम् अवलोकनेन उदाहरणकाव्यस्य स्वरूपं एवं स्पष्टं भवति ।

In Public domain. Digitization Muthulakshmi Research Academy

उदाहरणकाव्ये सप्तविभक्तिषु सप्तश्लोकाः एवं सम्बोधनप्रथमाविभक्तौ च एकः श्लोकः भवति।

अथोदाहरणादीनां लक्षणं कथ्यतेऽधुना ।
कल्पनीयानि पद्यानि सप्त सप्तविभक्तिभिः।।
सम्बोधनात्मिका चान्ते विभक्तिस्त्वष्टमी भवेत् । [1]

साहित्यकल्पद्रुमेऽपि उदाहरणकाव्यस्य लक्षणं संक्षेपेणैवमुक्तम् ।

येन केनापि तालेन गद्यपद्यसमन्वितम् ।
जयेत्युपक्रमं मालिन्यादि प्रासविचित्रितम् ।
तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ।।

उदाहरणकाव्यानां छन्दःप्रयोगविषये आलङ्कारिकेषु विभिन्नमतानि सन्ति। सामान्यतः शक्वरी प्रभृतीनि छन्दांसि भवितुमर्हन्तीति अमृतानन्दयोगिनः विद्यानाथस्य चाभिप्रायः। उदाहरणस्य प्रारम्भस्तु जयेति शब्देन मालिनीवृत्तेन च भवेदिति, विशेषेण गौडीरीत्याः प्रभावोऽपि स्यादिति एताभ्यां मतम् ।

तत्राद्यं मालिनीवृत्तं जयेत्यादिसमन्वितम् । [2]
रीतिः प्रधाना गौडीया गतिः स्याद् द्रुतमध्यमा । [3]
जयत्युपक्रमं मालिन्यादिप्रासविचित्रितम् । [4]
ओजः प्रसाधनाःशब्दाः सानुप्रासाः क्वचित्क्वचित् ।। [5]
ओजः कान्तिमती चैव गौडीया रीतिरिष्यते । [6]
शक्वर्यादिमहाच्छन्दोनिबद्धो योऽत्र दृश्यते।
हृद्यात्र रीतिर्गौडीया यत्र बन्धोऽतिबन्धुरः।।
ओजः प्रसाधनाश्शब्दाः।।[7]

उदाहरणे नायकः– उदाहरणकाव्ये नायकाः देवाः दैत्याः महीसुराः, गुरवः क्षोणीपालाः सामन्ताः, सचिवाः भवितुम् अर्हन्ति ।

अमुष्य नायकाः प्रोक्ताः देवा दैत्या महीसुराः।
गुरवः क्षोणिपालाश्च सामन्ताः सचिवादयः।। [8]

In Public domain. Digitization Muthulakshmi Research Academy

भवेयुर्यत्र नेतारस्सुरासुरमहीसुराः।
गुरवः क्षोणिपालाश्च सामन्तास्सचिवादयः।।[9]

कलिका उत्कलिका

एवं विभक्तिश्लोकानन्तरं कलिका उत्कलिकापि द्वे भवतः। कलिकायां अष्टौ पादाः भवन्ति उत्कलिकायामपि अष्टौ पादाः भवन्ति । तल्लक्षणानि एवं निर्दिष्टानि –

गद्यात्मकदलान्यष्टौ प्रत्येकं सयतीनि च ।।
अन्ते तूत्कलिका कार्या समस्तैकपदात्मिका ।
अन्ते पद्यसमायुक्ता यत्यनुप्रासशोभिनी ।।
चतुरुत्कलिका स्याद्वा विभक्त्याभासालाञ्छिता ।
कलिकोत्कलिकामृष्टनव्यताललयक्रमा ।।
प्रतिपद्यं भवेन्नेतृ नाम तत्तद्विभक्तिमत् ।।
विभक्तिघटना चात्र यथाकामं क्रमेण वा ।[10]

कलिकायाः लक्षणं भरतनाट्यशास्त्रे एवमुक्तं
गुर्वादिरथ लघ्वादिर्युग्मस्सर्वलघुस्मृतः।
चतुर्मात्रागणा ज्ञेयाः पूर्वच्छन्दोविकल्पनाः।।
पातोऽर्थकलितान् पातान् कुर्याल्लघ्वक्षरेषु च ।
गुर्वक्षरे तालगीतपातास्तु कलिका स्मृताः।। [11]

वामनः काव्यालङ्कारसूत्रवृत्तिग्रन्थे प्रथमाधिकरणे काव्यविशेषनिरूपणप्रसङ्गे गद्यकाव्यभेदनिरुपणप्रसङ्गे उत्कलिकायाः लक्षणमेवं प्रोक्तवान् ।

गद्यं वृत्तग्रन्धि चूर्णमुत्कलिकाप्रायं च ।[12]
पद्यभागवत्वृत्तगन्धि। [13]
अनाविद्धललितपदं चूर्णम् ।।[14]
विपरीतमुत्कलिकाप्रायम् ।[15]

अस्य भागस्य गोपेन्द्रतिप्पभूपालस्य कामधेनुव्याख्या एवं वर्तते ।

उत्कलिकाप्रायमिति – उत्कलिकोत्कण्ठा। "उत्कण्ठोत्कलिके समे" इत्यमरः। उत्कलिकायाः प्रायः प्रयोगबाहुल्यम् यस्मिंस्तत् उत्कलिकाप्रायं गद्यम् ।यस्मिन्

In Public domain. Digitization Muthulakshmi Research Academy

श्रूयमाणे श्रोतॄणामुत्कण्ठा बहुला भवतीत्यर्थः। कलिकाशब्दोऽत्र लक्षणया रुहरुहिकायां वर्तते । उल्लसन्तीं कलिकां रहरुहिकां प्रैति प्राप्नोतीत्युत्कलिकाप्रायम्। यत्र पदसन्दर्भपरिपाटी काण्डोपकाण्ड सन्दोहशालिनी। कलिकेवोल्लसति तदुत्कलिका प्रायमित्यर्थः।।

प्रतापरुद्रीयग्रन्थे क्षुद्रप्रबन्धलक्षणमेवमुक्तं

येन केनापि तालेन गद्यपद्यसमन्वितम्।
जयत्युपक्रमं मालिन्यादि प्रासविचित्रितम् ।[16]
तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ।। [17]

यत्रादौ जयेत्युपक्रमं मालिन्यादिवृत्तं रम्यं पद्यं निबध्यते अनन्तरमपि चेत्युपक्रममाण अष्टौ वाक्यानि सप्रासानि सतालानि प्रतिविभक्ति निबध्यन्ते अनन्तरं विभक्त्याभासाः तदुहारणम्।

रत्नापणव्याख्यानम् – कुमारस्वामिसोमपीथी

अथ क्षुद्रप्रबन्धेषूदाहरणस्य लक्षणमाह– **येन केनेति** । तालेन चञ्चत्पुटादिना , गद्यैः, क्रमेण कलिकोत्कलिकापरपर्यायैर्विभक्तिविभक्त्याभासाङ्कितैर्वाक्यैःपद्यैः प्रतिवाक्यमादौ तत्तद्वाक्यसमा–

नविभक्तिकनायकनामाङ्कितैः श्लोकैश्च समन्वितम् । मालिनी नाम वृत्तविशेषः। **ननमययुतेयं मालिनीभोगिलोकैः इति तल्लक्षणात् ।**

एवं प्रकारेण मालिनीवृत्तेन एवं जयेतिपदेन च उदाहरणस्यारम्भः भवति, कलिकोत्कलिकायां समानविभक्तिरूपाणि पदानि गद्यपद्यात्माकानि भवन्ति। कदाचातिविभक्त्याभासाः भवन्ति। अन्ते नायककविनामाङ्कितपद्यं भवतीति ज्ञायते।

उदाहरणकाव्यभेदाः

उदाहरणकाव्यस्य केचन नामान्यप्युक्तानि अलङ्गारसङ्ग्रहादि ग्रन्थेषु

अड्डुली – विभक्तिसंप्तकयुता सन्ध्याचैव विना कृता ।
अड्डुलीति समाख्याता सद्भिश्चाटुविशारदैः।। [18]

In Public domain. Digitization Muthulakshmi Research Academy

कल्याणी – केवलं कलिकासङ्गात्कल्याणीति निगद्यते । [19]

उत्फुल्लकवती – केवलोत्कलिकासङ्गादुत्फुल्लकवती भवेत् । [20]
यदुदाहरणं ख्यातं भवेत्कलिकया विना ।
उत्फुल्लकमिति प्रोक्तं नाम्ना चाटुविशारदैः।। [21]

फलोदाहरणम् – यस्यास्तूत्कलिकास्थाने केवलार्या प्रयुज्यते ।
सा फलोदाहरणं वा स्यादार्यासङ्गान्न भिद्यते ।। [22]
एषैव गद्यरहिता नवमाणिक्यमालिका ।
एषैव च त्रिगुणिता भवेन्नक्षत्रमालिका ।। [23]

एवम् अलङ्कारसङ्ग्रहे विभक्तिनामानि प्रोक्तानि तानि च–
केवला प्रथमा वाणी द्वितीया केवला झरी ।
तृतीया केवला वापी चतुर्थी केवला फणी ।।
पञ्चमी केवला सारी षष्ठी मोरीति कथ्यते ।
सप्तमी खलिका प्रोक्ता सम्बुद्धिः सरसावती ।।
भिन्नैर्वर्णैर्भिन्ननामसम्भवे च तथा भवेत्।
सर्ववाक्यं च कर्तव्यं कविनायकलाञ्छितम् ।।[24]

एवं नायकस्य कवेश्च विभक्त्यधिदेवतानाम् आशिषः भवन्तु इति विभक्त्यधिदेवाताः प्रोक्ताः तेषां नामानि
विराजन्ती कीर्तिमती सुभगा भोगमालिनी
कलावती कान्तिमती कमला जयवत्यपि ।
एता विभक्त्यधिष्ठात्र्यो देवाताः कथिता बुधैः।। [25]

संस्कृतोदाहरणकाव्यानि

संस्कृतवाङ्मये उदाहरणकाव्यानां संख्या अल्पैवेति वक्तुं शक्यते। उपलभ्यमाना– न्युदाहरणानि एवं प्रकारेण सन्ति ।

1. **बसवोदाहरणम् – पाल्कुरिकिसोमनाथः**
2. **रङ्गेशोदाहरणम् – अज्ञातकविकर्तृकम्**
3. **शिवोदाहरणम् – ओरुगण्टिरामय्य**

In Public domain. Digitization Muthulakshmi Research Academy

4. चिक्कदेवरायोदाहरणम् –तिरुमलाचार्यः

5. मल्लिकार्जुनस्तवोदाहरणम् – श्री कालीपट्नपु सिद्दरामकविः

6. श्री वेङ्कटेश्वरोदाहरणम् –श्रीभाष्यं विजयसारथिः

7. श्री रामोदाहरणम् – श्रीभाष्यं विजयसारथिः

8. श्रीरामानुजोदाहरणम् – श्रीभाष्यं विजयसारथिः

9. श्री रघुनाथदोशिकोदाहरणम् – श्रीभाष्यं विजयसारथिः

निडदवोलु वेङ्कटरावमहाशयस्याशयानुसारं संस्कृते उपलभ्यमानोदाहरण–परिशीलनेन ज्ञायते यत् संस्कृतोदाहरणानि तेलुगु उदाहरणकाव्यलक्षणासमन्वितानीव दृश्यन्ते, यतः तेलुगु उदाहरणकाव्याविर्भावविकसानन्तरमेव (पाल्कुरिकि सोमनाथः 1160–1240) संस्कृते अमृतनन्दयोगी (12शताब्दः) विद्यानाथः (13शताब्दः) उदाहरणकाव्यलक्षणनिरूपणमभवदिति वक्तुं शक्यते।

यद्यपि प्रतापरुद्रीयग्रन्थे एवं अलङ्कारसङ्ग्रहादि ग्रन्थेषु उदाहरणकाव्यस्य लक्षणानि निरूपितानि तथापि संस्कृतवाङ्मये उदाहरणकाव्यरचना अत्यल्पैव दृश्यते। तेलुगुसाहित्यप्रभावेन एवं कर्णाटकराज्ये च केचन कवयः उदाहरणकाव्यान्यरचयन् इति ज्ञायते। अतः एतादृशसारस्वतप्रक्रियां सर्वे जानीयुरित्य- भिप्रायेण तेलुगुलिप्यां विद्यमानानां उदाहरणकाव्यानां सङ्ग्रहः ग्रन्थरूपेण संस्कृतपरिषदा प्रकाश्यतेति अत्यन्तमुदावहोऽयं विषयः इति विज्ञापयन्, अवसरमेनं कल्पितवद्भ्यः अस्माकं निदेशकवर्येभ्यः आचार्य के. नीलकण्ठम् महोदयेभ्यः सभक्तिकं धन्यवादं समर्पयामीति शम् ।

डा. सन्तोषकुमारः जोशि

In Public domain. Digitization Muthulakshmi Research Academy

पादटिप्पण्यः

[1] अलङ्कारसङ्ग्रहः11-6

[2] काव्यालङ्कारसङ्ग्रहः 11-9

[3] काव्यालङ्कारसङ्ग्रहः 11-8

[4] प्रतापरुद्रीयं काव्यप्रकरणं 73

[5] काव्यालङ्कारसङ्ग्रहः 11-8

[6] प्रतापरुद्रीयं काव्यप्रकरणम् 28

[7] पदार्थदीपिका

[8] अलङ्कारसङ्ग्रहे 11-17

[9] पदार्थदीपिका

[10] अलङ्कारसङ्ग्रहे एकादशतरङ्गे 1-12 श्लोकाः

[11] नाट्यशास्त्रम् 31- 317,18 श्लोकाः।

[12] काव्यालङ्कारसूत्राणि 1-3- 22

[13] काव्यालङ्कारसूत्राणि23

[14] काव्यालङ्कारसूत्राणि 24

[15] काव्यालङ्कारसूत्राणि25

[16] प्रतापरुद्रीयं काव्यप्रकरणं 73

[17] प्रतापरुद्रीयं काव्यप्रकरणं 74

[18] अलङ्कारसङ्ग्रहः 11-18,19

[19] अलङ्कारसङ्ग्रहः 11-19

[20] अलङ्कारसङ्ग्रहः 11-20

[21] प्रबन्धदीपिका

[22] अलङ्कारसङ्ग्रहः 11-20

[23] अलङ्कारसङ्ग्रहः 11-24,25

[24] अलङ्कारसङ्ग्रहः 11-21-24

[25] अलङ्कारसङ्ग्रहः 11-13,14

In Public domain. Digitization Muthulakshmi Research Academy

पाल्कुरिकि सोमनाथकविविरचितम्
बसवोदाहरणम्

In Public domain. Digitization Muthulakshmi Research Academy

पाल्कुरिकिसोमनाथः

पाल्कुरिकि सोमनाथः तेलुगुसाहित्ये शिवकवियुगकालीनः कविपण्डितः। अस्य कालः 1160-1240। अस्य पितरौ श्रियादेवी-विष्णुरामदेवौ। अयं तेलङ्गाणाप्रदेशस्थ वरङ्गल् मण्डलान्तर्गत पाल्कुरिकि इत्याख्यस्य ग्रामस्य निवासीति ऐतिहासिकाः उदघोषयन्।। वीरशैवसम्प्रदायप्रचाराय कटिबध्दः अयं नैकशास्त्रपण्डितः महकाविः, संस्कृत तेलगु कन्नडभाषासु नैकान् ग्रन्थान् व्यरचयत् । ते च ग्रन्थाः -

संस्कृत ग्रन्थाः – 1.सोमनाथभाष्यम् 2.रुद्रभाष्यम् 3.बसवोदाहरणम् 4.वृषभाष्टकम् 5.त्रिविध- लिङ्गाष्टकम् 6.पण्डिताराध्योदाहरणम् इत्यादयः प्रसिद्धाः।

तेलुगुग्रन्थाः – 1.बसवपुराणम् 2.वृषाधिपशतकम् 3.चतुर्वेदसारम् 4.पण्डिताराध्यचरित्र 5. चेन्नमल्लुसीसालु 6.बसवरगड 7. तेलुगुबसवोदाहरणम् 8.बसवाष्टकम् 9.बसवपञ्चकम् 10. पञ्चप्रकारगद्य 11. नमस्कारगद्य 12.अक्षराङ्गगद्य 13. बसवारूढ्यरगड 14.सोमनाथस्तवः इत्यादयः प्रसिद्धाः।

कन्नडग्रन्थाः - 1.सद्गुरुरगड 2. चेन्नबसवरगड 3.बसवलिङ्गनामावलि अस्य कवेः संस्कृतग्रन्थास्तु नोपलब्धाः किन्त्वत्र प्रस्तूयमानं बसवोदाहरणकाव्यं श्री डदवोलु वेङ्कटराव् महाशयस्य उदाहरणवाङ्मयग्रन्थात् स्वीकृतम् ।

एतस्योदाहरणकाव्यस्य मातृकानां विवरणमेवमस्ति-

1. प्राच्यलिखितपुस्तकभाण्डागारः- चेन्नपुरी संख्या 9564
2. श्रीबण्डारु तम्मय, निडदवोलु वेङ्कटराव् महाशयाभ्यां सम्पादितमिदं बसवोदाहरणं आन्ध्रसाहित्य परिषत्पत्रिकायां (सं 32, स्वभानु श्रावणकार्तकौ ,पृष्टसंख्या 81-88 प्रथमवारं प्रकाशितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयतु बसवराजः प्राणलिङ्गात्मपूजः
शरणदिविजभूजः स्मेरसंवित्सरोजः।
गणपरिषदधीनः ख्यातदानावधानः
सरसमहिमगानः स्वानुभूत्यैकमानः।।मालिनी ।।

कलिका(हरिगतिरगड)

अपि च पुरातन नूतन शिवगणपादोदकपरिलपदभिषेकः
क्षपित विपल्लवपल्लव जङ्गमलिङ्गसमर्चननिचितविवेकः
सतत विकस्वरभास्वर निजमुखमण्डलखण्डित रजनीनाथः
कृतयुगवर्तन कीर्तन निरसन निपुण पवित्रचरित्रसनाथः
प्रकटित दर्पक दर्पकरेणु प्रमथन निशित कराङ्कुशहेलः
शुकमुख मानस मानसकमलाकर विहरणचण राजमरालः
स्वानुभवाञ्चित कूडलिसङ्गमसन्तत देवध्यानाभिज्ञः
सूनृतभाषण भूषण वाणी सिंहासन गम्भीरसज्ञः।।

उत्कलिका

कावुल नाराटध्वनिनारीरः
श्रीविश्रुत पेशल शारीरः
व्यतिकरसन्धायि चमत्कृतिभूमः
श्रुति मुखरस्वर सरससमेतः
स्मृति निकुरुम्ब रसायनगीतः
प्रमुदित हृद्वर्तन शितिकण्ठः
शमदमलालन गुणितोत्कण्ठः।।

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

वेदान्ताररहस्यभेदपिशुनव्यापारपारङ्गत
प्रौढप्रक्रियवाक्प्रपञ्चरचनाचातुर्यधुर्याशयम् ।
दैवास्तिक्यनिदर्शनप्रतिभुवं तापच्छिदापण्डितं
भाण्डागारधुरीणमत्र बसवामात्यं किमाचक्ष्महे ।।

कलिका (द्विरदगतिरगड)

अपि च करतलयुगल विहितपुरहरयजन-
मवहित करणतत परिमुदितशरणजन
महिमकरशशिसरणि विमुथ निजपवनगति
महिपरिषदधिपनिभ विविध मधुरिम सुमति
मतुलकरिहरिकनकमणिगणगुणितविभव
मतिविषम बहुलतरभव जलधिकलशभव
ममल निजहृदय कृत परिचय विदनुभवं
शमित निरवधिक कलिवृजिन सहचरभवम्।।

उत्कलिका

निरतिशयजनदुरित
निरसननिपुणचरित
घनविषयरसविमुख
सनकशुकजनकमुख
सकलयमिजनविमल
विकसित हृदयकमल
परिकलनमधुकरं
शरणजनशिवकरम्।।

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

आस्थाने शिवनागसंयमिकरद्वन्द्वाङ्गुलिश्रेणिका
लीला लालनमन्थनादजनयत् यः क्षीरधारावलिम् ।
तेनात्यद्भुत कर्मकर्मठ महामाहात्म्यवर्धिष्णुना
भाण्डागार धुरन्धरेण बसवामात्येन कः स्पर्धते ।।

कलिका (तुरगवल्गनरगड)

अपि च निगमसारभूतवीरशैवदीक्षितेन
तपनशतसहस्र सदृशदेहदीप्तिलक्षितेन
खण्डितप्रसूनविशिखचाप दण्डल स्तकेन
मण्डितानुभावशरणचरणकलितमस्तकेन
विदलित प्रचण्ड विविधविषमगर्जितेन
हृदय विवर निवसन प्रगाढलौल्यवर्जितेन
नीलगलविशिष्टभक्तभवनपुष्यदिन्दिरेण
भालनयनविमलहृदयकमलमध्यमन्दिरेण।।

उत्कलिका

यावनालराशिनिहित
भूविनुतकटाक्षमहित
शक्तिवैभवाभिजात
मौक्तिकप्रदाननीत
साङ्गभक्तवृषभनित्य
रङ्गवल्लिनियमकृत्य
दृष्टसाद्भुतक्रमेण
दुष्टदलनविक्रमेण

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

वेदान्तोदितवीरशैवसमायाचारव्रतप्रक्रिया
चर्यादेशिकसार्वभौम महिमभ्राजिष्णवे जिष्णवे।
भाण्डागारदुरन्धराय भसवामात्याय चेतस्सदा
जागृत्कूडलि सङ्गमेश्वर महादेवाय तस्मै नमः।।

कलिका (हरिगतिरगड)

गौतमकणादकुम्भजच्यवनमुख्यमुनिसद्मने
तपनवह्निहिमभानुलोचन त्रिपुरवैरिगणभावितात्मने-
करतलस्थनिखिलाण्डमण्डलि प्रकटकण्डुकसदाविहारिणे
करिटिदैत्यघनतुङ्गमस्तक क्षरित मौक्तिकनिकायहारिणे
कुसुमबाणसंहति ग्रसनधीरगुणसारशोचिषे
वसुमतीप्रमुखभूतचेतनप्रददयामयकटाक्षरोचिषे
विततपातकसमूहसानुमद्विततिनिर्दलनवज्रबाहवे
श्रुतिसमुत्करसदाविरोधकृत्समयबौद्धमुखचन्द्रराहवे।।

उत्कलिका

रुचिररत्नमहनीयमहाटक
प्रचुररूपजवसत्त्वघोटक
त्वरितधूतसृणिपातधारण
क्षरितदानजलगन्धवारण
प्रथितवस्तुपरिषन्निरन्तर
प्रथमहामहिमकारणान्तर
स्मितपरिस्फुरितभक्तिचेतसे
स्तुतिवचोमुदितवह्निरेतसे ।।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

चेतकीलितसङ्गमेश्वरमहादेवालिकप्रस्फुर
ज्ज्वालजालजटालवह्नि शलभाकारप्रसूनाम्बकात्।
भाण्डागारधुरन्धराद्बसवनामात्यात्सुपर्वावली
चूडाघृष्टपदारविन्दयुगलान्नैवापरं दैवतम् ।।

कलिका (हरिगतिरगड)

अपिच जगत्त्रयकर्णसुधारसकुल्याञ्चितसूनृतजल्पकात्
कुपितान्तर्गतरिपुषड्वर्गमहोत्कटमस्तकतटकुट्टाकात्।
परपनिताजनभासुरमुखमण्डलवीक्षणविधिजात्यन्धात्
निरतिशयानुग्रहशितखड्गलतापरिलूनपुनर्भवबन्धात्
कन्नडब्रह्मयकरुणादुग्धार्णव संवर्धनराकाचन्द्रात्
किन्नेरब्रह्मयपुरहरगोष्ठीसल्लपनाकर्णननिस्तन्द्रात्
लालितसरलपुरातनगणवाङ्मणिमुकुरप्रतिबिम्बितरूपात्
लीलालालसरसमणिचञ्चलनयनाञ्चलशितिविशिखदुरापात्।।

उत्कलिका

आशाजलसुतशिखरिसमूह
क्लेशतिमिङ्गिलमित्रग्राह
स्वकलत्रसमुत्करनवफेन
प्रकटितबान्धवमण्डलमीन
व्याधिपरिषदुत्तुङ्गतरङ्ग
क्रोधविजृम्भणघोरभुजङ्ग
न्फुरदुरुतरभवजलधिवहित्रात्
दुरितलताचयलवनलवित्रात्।।

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठीविभक्तिः

चिद्व्योमस्मयमानशीतकिरणोद्योतत्सुधामाधुरी
निर्वृत्तस्नपनप्रमोदभरितश्रीनीलकण्ठात्मनः।
उन्मीलद्गुणरत्नरोहणमहाशैलस्य तस्य प्रभोः
भाण्डागारधुरन्धरस्य बसवामात्यस्य दास्यं भजे ।।

कलिका

अपि च शरनीहारहारमलयजभसितसितदिव्यदेहस्य
कुपथचरदुर्भावभावभवमदविहृतिहृदिसुसन्नाहस्य
सङ्गमेश्वरनिहितहितमधुरसङ्गीतगीतानुभावस्य
जङ्गममनस्सङ्ग सङ्गतेहादावदावप्रभावास्य
भक्तिमहिलाश्लेषजनितमेदुरविपुलपुलकसंयोगस्य
मुक्तिसौख्याधानदानविद्यानिरतरतमहोद्योगस्य
परिचितसुधासारसारमधुरिमनिकृतिकृतिचणवचस्कस्य
धरणिदिग्वियदतलतलनिबिडशशिकरनिकरनिभयशस्कस्य।।

उत्कलिका (द्विरदगति)

निटललोचनभक्तवात्सल्यकल्याण
कटकनीतावासनिस्सीमकल्याण
गोचराञ्चितवपुर्विस्फूर्ति मडिवालु
माचयप्रभुदीर्घनयनाञ्चितोत्काल
कोपप्रसाद(भाजन)ताविधाक्रान्त
दीपितप्रथमानभक्तिविनयात्यन्त
भारवैदिकसुविश्रुतशिवाचारस्य
सारजङ्गमसूक्तिमणिकर्णपूरस्य।।

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

ओङ्काराङ्कुरवेदपल्लवलसत्पञ्चाक्षरीमञ्जरी
तत्त्वामोदनितान्तलुब्धशरणानीकेद्वपुष्पन्धया।
यासौ नादलतातदीयसुषमारामाभिरामस्थले
तस्मिन् श्रीबसवाह्वये गुणनिधौ किं वा न लोकोत्तरम् ।।

कलिका (मधुरगतिरगड)

अपिचाधारानुरङ्ग ज्ञातरि
सुपथपथिकचित्सुखसन्धातरि
वर्गचतुष्टयदापनशीलिनि
दुर्गतिनिरसनकरुणाशालिनि
शरणपदाब्ज पराहललामिनि
दुरितनिरासदुरन्धरभूमिनि
वेदविरुद्धाचारपरिद्विषि
नादसुधाप्रणितपुरविद्विषि।।

उत्कलिका

सुरगिरिमन्दर
निरुपमकन्दर
घनतरचन्दन
वनचयनन्दन
महिलासहचर
विहरतखेचर
लालितनामनि
कीलितसामनि ।।

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

मूलाधारविकस्वराम्बुजवनी मध्यस्फुरद्वीचिका
यातायातविनोदपेशलमते चिद्व्योमशीतद्युते।
संसारार्णवकर्णधारकृपया मां पालय प्रत्यहं
भाण्डागारधुरन्धरेश बसवामात्येश चूडामणे।।

कलिका (द्विरदगति)

अपि च पालित वीरशैवव्रताचार
कृपणजनरक्षण कृतचरणव्यापार
सितयशः कर्पूरवासितब्रह्माण्ड
मितिरहत किल्बिषाम्बुज षण्ड वेदण्ड
भुजगवर सुर गरुड खचरकिन्नरसाध्य
निजगुणश्रवणतोषितपण्डिताराध्य
शतमखतरुस्फीतगणपरिषदुत्कण्ठ
ततविततघनसुषिरकीर्तित श्रीकण्ठ।।

उत्कलिका

शुकमुखमनोगम्य
विकचगुण गणताम्य
दल्लमप्रभुसत्य
सल्लिपनसाङ्गत्य
साधितस्वात्माव-
बोधनिजवद्भाव
शिवतत्वविस्तार
भक्तिपथविस्तार।।

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

यस्सङ्गीतनिधिर्यमाहुरभवं येनार्चितं सूनृतं
यस्मैस्वस्ति यतस्तदीयमुदभूत् यद्वीरशैवव्रतम् ।
यस्यापाङ्गसहोदरी च करुणा यस्मिन्महत्त्वाधिकं
सत्वं त्रीणि जगन्ति पाहि बसवामात्येश चूडामणे ।।

आर्या

श्रीबसवराजगुणमणि
खचितं जयतात् सुवर्णमेतत्।
सोमसुकविना रचितं
हृदयाभरणं सदामुदाहरणम् ।।

*****

In Public domain. Digitization Muthulakshmi Research Academy

रङ्गेशोदाहरणम्

(अज्ञातकविकर्तृकम्)

रङ्गेशोदहारणकाव्यम् अज्ञातकविकर्तृकम्। काव्यमिदं "कन्दलार्यविरचित अलङ्कारशिरोभूषणे" उदाहरणमिदम् उल्लिखितम् इति डा.पण्डरि सरस्वतिमोहन् महोदयया कृत **चमत्कारचन्द्रिका क्रिटिकल् एडिशन् आण्ड स्टडी** इत्याख्यग्रन्थस्य पीठिकायां प्रस्ताविता। ग्रन्थोऽयं 1972 तमे वर्षे मेहर्छन्द् लछमन्दास् डिल्ली द्वारा प्रकाशितः। तदाधारेणैव काव्यमिदं प्रकाश्यते ।

उदाहरणकाव्येऽस्मिन् रङ्गेशवर्णनम् अस्तीत्यतः एवमेव सार्वविभक्तिपद्ये "रङ्गेशो हरता" इत्यादिश्लोकेन रङ्गेशसम्बद्धम् उदाहरणमिदं रङ्गोशोदाहरणम् इति नाम सार्थकतां भजत इति अभिप्रायः।

उदाहरणकाव्यलक्षणानुसारं नामङ्कितपद्यम् अवश्यं भवेत् किन्तु अस्मिन् उदाहरणे तादृशं पद्यं न दृश्यते ।अतः काव्यकर्तृविषयाः न ज्ञायन्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयतु जयतु भामा चारुदोर्मध्यसीमा
सकलशुभदनामा सच्चिदानन्दभूमा ।
वरसुगुणललामा वैजयन्त्याख्यधामा
सजलजलदधामा सन्ततं रङ्गधामा ।।

कलिका

अपि च महीधरभृत्यवनीधरणास्रपवेधरसावनवित्तः
तपनतनूभवशाश्वतवैभवदायिदयाभवनायिताचित्तः
स्वरुशरनारदशङ्करशारदचन्द्रपटीरवराभसुकीर्तिः
खरकरपावकगत्यभिभावुककान्त्यतियावकविक्रममूर्तिः
पटुजयविन्नगणावृत्तिमन्नगपक्षभिदन्नागरुद्रथवाहः
त्रुटितमतङ्गदवाज्य (श्च) रसङ्गजदोषरथाङ्गजिरीजृभिवाहः
सविनतामरसासनभीमरसप्रभुपामरराट्कृतदास्यः
स्वविकलशारदशश्यनुकारदशातिनिशारदकान्तिमदास्यः।।

उत्कलिका

कलुषसमीहससाहसचेतः
कलितोदञ्चनकाञ्चनरेतः
सुहुतकरासिनिजासिनकृत्तः
स्वहितशिरोकनिरोदितचित्तः
स्मरहरिदिष्टसदिष्टसदे(ते)जः
स्फुरमनुजासनाशनबीजः
स्थिररणकौशलपेशलसारः
स्फुरदचिरांशुकलांशुकसारः।।

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

पर्णाम्भः पवनाशिनो नियमनात्प्राणस्य मुक्तेः कृते
किं गात्राणि परिक्रशय्य मुनयः क्लिश्नन्ति नित्यं घने ।
भूयश्शुष्यथ नैव चेद्ध्रुवफलं ब्रूयामुपायं लघुं
रागाद्यात हरिं सकृ(त)न्नमत भो रङ्गे भुजङ्गेशयम् ।।

कलिका

अपि च सन्ततश(शा)तयतिबृन्दहृतदम् (हृत्पदम्)
विपुलसह्यात्मजावीचितिम्यत्पदम्
शशिसरस्तीरमञ्चारवीतक्लमम्
पशुपतिप्रणुतभूभाग्यभूतक्रमम्
जननुतेक्ष्वाकुशश्वत्तपस्याफलम्
तनुनखोल्लिखितगोदास्तनश्रीफ(ल)म्
सरसिजासनदेवसततसम्पूजितम्
परमदीनानुकम्पानिशभ्राजितम् ।।

उत्कलिका

वल(र)पूर्वशैलक-
न्दरकान्तरालक-
न्दलदम्बजातक-
न्धुलवप्रणीतव-
न्धुरभानुपुञ्चस-
ङ्करफुल्लतञ्जसं-
शयकारिवीक्षणम्
भयदारितक्षणम्

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

श्राम्स्यार्य कुतः क्व दा किमयसे स्नातुं कवेरात्मजां
काश्यां मूढ विसृज्य विष्णुपदजां किं यासि भोस्तत्समाम् ।
जानीषे किमिदं न वत्स वसता तत्सैकते रङ्गिणो (णा)
गङ्गाधिक्यमुपार्प्य मुक्तिरनया स्नात्रे सुखं दास्यते ।।

कलिका

अपि च (अ) निशार्कबिम्बान्तरे(र)वासेन
वपुरग्रभाजितोज्ज्वलमनोल्लासेन
घनविक्रमत्रयाक्रान्तत्रिलोकेन
वनजोत्पलोल्लसवर्धनालोकेन
दशमुखानुजि (ज) मोददायिप्रसादेन
दशदिशातटभिदुद्यज्ञा (ज्या) प्रणादेन
भूरिभोगाभोगिभोगीन्द्रतल्पेन
भीरुकाकार्तिलोपिक्षमाकल्पेन ।।

उत्कलिका

अभवदाकीर्त्येन
सभराप्तिमर्त्येन
कैतवस्फारेण
घातोग्रकारेण
वरिपुदानवसेन
भावविख्यातेन
गुरुतमस्मरसेन
कोविदज्ञातेन।।

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

दैत्यामर्त्यसमर्थरक्षितध()राधारा यथा रायति
प्राञ्चन्नन्दकखण्डितामरवितानारायनारायण।
अस्तु स्वस्ति करालदावदहनाहोराय होरायत
स्थेमश्रीकुचकुम्भलभ्यशशभृद्धीराय धीराय ते ।।

कलिका

अपि च कपिचयेशनाशनावितालिखनन्दनाय
सपदिविपदिताभयी(ये) भसत्तमात्तवन्दनाय
धातृसोतृपद्मसद्मताभिशोभिनाभिकाय
पूतभूतरूपगोपपुङ्गवाङ्गनाभिकाय
नामदामगोपवेपनाकलोकनायकाय
भूमिजामिताकलोकभुक्तिमुक्तिदायकाय
पादजोदकचितरचितपापतापकर्तनाय
वेदवादशृङ्गरङ्गविहितमहितवर्तनाय।।

उत्कलिका

विग्रहाग्रभूसहाय-
ताग्रहोग्रबलसहाय-
गाढगूढवाणकाय-
रूढबाढदोर्निकाय-
लूनिमानितत्वराय-
तानिशानितातान्तराय-
युद्धबद्धकौशलाय-
बुद्धिशुद्धिपेशलाय।।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

स्वि(खि) द्यत्वे मुनि(मनु) ताश्चिरात्सुतसुहृद्दारादिचोराचिते
किं दुष्कर्मदवोषिते भवमहारण्ये कुरङ्गा इव ।
नेष्यन्ते रजयत्यरादिह यमव्या धोऽपयाताञ्जसा
रङ्गं गच्छत नित्यमाध्वमभयं वन्दध्वमत्राच्युतात् ।।

कलिका

अपि च समीरणपारणमुत्त महाशयनेशयताश्चिचनिद्रात्
कपिलपराशरदाशरथीज्यमुखस्तुतविस्तृतसद्गुणभेदात्
क्षतघनविश्रुतिकश्रुतिहृन्मधुकैटभकूटभवज्भषवेषात्
सततदयारसपूरसमञ्चदसादमनोदमसम्भृततोषात्
वनपिरिधावकपावकपाननिवारितभूरितरव्यथघोषात्
घनतरकाशि(लि)यमौलियथामदकर्तननर्तनकृतजनपोषात्
स्मरशरलूनवधूनवसंज्वरसाधनमोदनरासविहारात्
दरकरदानवसेववनानलताहितभूहितभूर्यवतारात् ।।

उत्कलिका

भुक्तभवाशुभवाशुभदूरा-
न्मुक्तगृहावनचावनागारा-
त्फलदलसूनिलतानिलतोया-
च्छिलपरितापसरूपसदाया-
द्योगनिकामदयामदलोभा-
त्स्वान्तनिशान्तनितान्तनिवासा-
त्स्वान्तरशान्तरसान्तरघासात् ।।

In Public domain. Digitization Muthulakshmi Research Academy

षष्टीविभक्तिः

स्तोतू रङ्गपुरेऽपराघपटलीचोरस्य चोरस्यति (तः)
स्फारश्रीकरभूषणीकृतवधूसारस्य सारस्यतः।
नंनम्ये पुरुषस्य पद्युगमिहानव्यस्य नव्यस्य मे
भक्तानां भुवि जन्मसन्मुनिमनोभाव्यस्य भाव्यस्यतः।।

कलिका

अपि च सारपौरवैरिणास्त्री(स्त्रि) दारिबलयुतस्य
निपुणदूरितात्मवैरिनित्यसूरिकुलवृतस्य
नामजापकाद्रिचापनायिरापणायितस्य
कामतापदूनगोपकन्यकापचायितस्य
पोषविन्दवेदवृन्दपुण्यकन्दलायितस्य
\घोषनन्दनीयनन्दगोपनन्दनायितस्य
वर्धितारिविन्दकैरवप्रकारलोचनस्य
गर्धदूरयोगिसारकर्मभारपाचनस्य।।

उत्कलिका

स्फीतबान्धवापरस्य
धूतदारुणार्चितस्य
शिष्टकैरवाचितस्य
दानकृद्दयाकरस्य
तार्तताण्डवीपरस्य
दार्तिभङ्गसातकस्य
दानकृद्दयाकरस्य
दानवक्षि(क्ष) याकरस्य।।

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

विष्वग्भ्राम्यसि किं मुधा ननु मनस्तूर्णं सदालर्कव-
द्याचे त्वां विहिताञ्जलिं कुरु सकृद्दीनस्य मे प्रार्थितम् ।
नूनं येन कृतार्थता मम भवेन्न स्यात्तवापि श्रम-
स्तिष्ठ स्वामिनि रङ्गधामनि परे पुंसि क्षणे निश्चितम् ।।

कलिका

अपि च रमारमणीरमणीयभुजान्तरकान्तरविप्रभरत्ने
प्रमदनतत्परहृत्परमासिकपालितशीलनवानिशयत्ने
कृतजगदाक्रमविक्रमणत्रयखेदितमोदितबलिदनुजारौ
क्षितिधरधारणकारणकूर्मविशेषकवेषकलाद्यतिचारौ
चतुरवलाहकवाहकमुख्यदिशापसमीपसदाहितदास्ये
जितहितभुक्क्रमकुङ्कुमचित्रकचित्रकलाढ्यदिगास्ये
पृथुककणाशनदाशनधूताभीलकुचेलकुलागतदैन्ये
प्रथितपविक्रमचक्रमणिक्षतबालिशदूलिशठामितसैन्ये ।।

उत्कलिका

विततबृसीमदनेमदमध्ये-
धितमुनिसेवनपावनमध्ये
कनकसरिद्रसवद्रसपुलिने
तनवरुगायतनायतमलिने-
तरमणिभासितभासितनागे-
श्वरवितताामलकोम(ल)भोगे
शयतास्तानवमानवपापे
भयकृन्मोहदुरीहदुरापे

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमा

कन्दर्पायुतकल्पभव्यसुगुणैकाकल्पसद्यः फलो–
द्यत्सङ्कल्पनतौघकल्पविधिसूरङ्गेशरङ्गेशय।
कालाशीविषभीतमेतमिह मां गाढानुकम्पालय
श्रीमन्पालय निक्षिपालयमयि स्निग्धान् कटाक्षान् मयि।।

कलिका

अपि चात्यनपसारवाताहारहारदेवोदारदारवर्णितचर्य
जपतप स्थिरधीरधीरसाशननीरनीरसद्विजसारसारतात्ययसूर्य
विनतापाण्डुरपत्रपत्रवित्तपमित्रमित्रसम्भववृत्रमुख्यसुधांश
विनुतकीर्तिपवित्रवित्रसत्तापात्रपात्रयीतनुगोत्रगोत्रचित्रनिवेश
निकृतमत्यतिमानमानवार्तिनिदानदानवेन्द्रवितानतानवावहलील
मकरराडपदानदानहीनददीनदीनतार्त्यवसानसाधजप्रथशील
बहुमणीपरभागभागनूनाभोगभोगसङ्घटनागनागबद्धस्वाप
महितसाधुसमागमागतस्फुटरागरागमोहवियोगसुग्रहरूप।।

उत्कलिका

तारतारकहीरहारपगाङ्ग
नारनारदसैन्दुवारवारणसाङ्ग
राजराजहरिद्धराजराजितगोत्र
राजराजसखाच्छगोजगोजकलत्र
सूतसूतभिदम्बुजातजातनुयान
जातिजातिसुधांशुभातिविमान
नासनासमकीर्तिभासिभासितलोक
वासवासहनेन्धनासनालरधीक।।

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

रङ्केशो हरतामघानि सततं रङ्गेशमेवाश्रये
रङ्गेशेन हतार्तिरस्मि कलये रङ्गेशयित्रे नमः।
रङ्गेशात्सुखमाप्नुयां विरचये रङ्गेशितुः पूजनं
रङ्गेशे मम भक्तिरस्तु सुदृढा रङ्गेश पापा(हि) स्वयम् ।।
उदाहरणमर्णवोऽकृत परस्य यस्य श्रिया-
मुदाहरणमात्मनस्तमपि कौस्तुभं कूकुदः।
उदाहरणमित्यतो व्यरचयाम सङ्घास्सता-
मुदाहरणमाद्य(द्द)ताश्शृणुत तस्य रङ्गेशितुः।।

*****

In Public domain. Digitization Muthulakshmi Research Academy

ओरुगण्टि रामयामात्य-कविविरचितम्

शिवोदाहरणम्

ओरुगण्टि रामयामात्यः आन्ध्रप्रदेशस्थ अनन्तरपुरनामकमण्डले जनिम् अलभत। अयं कविः **कवितालक्षणसारच्छन्दस्सु सुभद्रापरिणयम् शकुन्तलाभ्युदयम्** इत्यादि तेलुगुद्विपदकाव्यानि प्रणिनाय। रामयामात्यः संस्कृतभाषायां शिवोदाहरणाख्यं लघुकाव्यं अरचयत्। कवेरस्य जीवनं, कालः इत्याद्यंशाः तेलुगुसाहित्येतिहासग्रन्थेषु कुत्रापि नोपलभ्यन्ते।

शिवोदाहरणं प्रस्तुतकाव्यं निडदवोलु वेङ्कटरावमहोदयस्य "उदाहरणकाव्यचरित" ग्रन्थात् स्वीकृतः। काव्यमिदं आन्ध्रसाहित्यपरिषत् भाण्डगारे विद्यमान तालपत्र ग्रन्थाधारेण (संख्या 4478) प्रकाशित इति तस्मिन् ग्रन्थे निडदवोलु महाशयेनोल्लिखितम्।

In Public domain. Digitization: Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयति भुवनदीपो चन्द्ररेखाकलापो
भयदरिपुविभेदः पार्वतीसम्प्रमोदः।
नियमयमविशेषो नित्यकल्याणवेषः
प्रियधृत फणिहारः श्रीनगाग्रे विहारः।।

कलिका

अपि च तुरङ्गतरङ्गवतीशः
त्रिपुरभुजङ्गविहङ्गगणेशः
किन्नर नूतनगीतविनोदः
भिन्न च नातप नातपभेदः
परम दयाह्रदयाम्बुजमित्रः
------- पुरुषयोगमनित्रः
द्विषदुरुधिषण सुधीषणकेलिः
सुषमा लसदहि विषधरमौलिः

उत्कलिका

स्फुरितकपर्दी
दुरितविमर्दी
सहजयशस्वी
महिततपस्वी
भुवनकुटुम्बी
दिवसविडम्बी
ब्रह्मकपाली
जिह्मगमाली।।

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

ईशं बालेन्दुमौलिं हिमकरधवलं हेमभूभृद्धनुष्कं
व्यालं शूलं च वीणां हरिणमपि करेष्वङ्कितं श्री गीरीशम्।
मौलौ गङ्गामपर्णां महित वपुषि चर्म---- द्विपेन्द्र कट्यां
ज्वाला श्री भालनेत्रं सकलममृतविस्फारवत्सत्कटाक्षम् ।।

कलिका

अपि च श्रीनगहर्म्यविहारं
विपुलभुजं विश्रुतवीहारं
तरुणारुण शुभतरघनजूटं
गिरितनयालङ्कृततनुकूटं
वरमुनिहृदय निवातकदीपं
पुरुषोत्तम तनुभूषितरूपं
शरणागतरक्षणपरिदक्षं
परमदयारसभरितकटाक्षम्।।

उत्कलिका

वरद शुभङ्कर
दुरित भयङ्कर
करिवर भञ्जन
तरुणी रञ्जन
नमित पुरन्दर
रमणी सुन्दर
मनसिज दलनं
मुनिहृदि कलनम्।।

In Public domain. Digitization: Muthulakshmi Research Academy

तृतीयाविभक्तिः

जगत् सृष्टौ ब्रह्मा जनितमहिमस्त्वावननिधौ
प्रगल्भो दैत्यारिः प्रलयसमये भर्ग इति च ।
सुगीता यस्मिन् संस्तुति महित वस्तुप्रतिकृता
नगाधीशेन श्रीनगविहरणानन्दरुचिणा ।।

कलिका

अपि च मृगपतिनेव पञ्चाननत्वेन
विपुलभुजगेन धृतविषधरभरत्वेन
कवकाचलेनेव दिविजाश्रयत्वेन
(पादलोपः)
पुरुषोत्तमेनेव भुवनभरणत्वेन
विमलचित्तेनेव धृतहंसवर्णेन
समर्थस्थलेनेव भूतसङ्कीर्णेन ।।

उत्कलिका

हतदक्षयागेन
जितकोपरागेन
परतत्त्वरूपेण
परिहृत्यपापेन
करुणाकटाक्षेण
शरणगतरक्षेण
दमितपद्मभवेन
शमितचित्तभवेन।।

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

ग्रैवेयद्युमणिद्युतिस्फुरितहारेणेव रत्नप्रभा
सौवर्णोज्ज्वलभोगि भोगपटल ज्वालाज्वलन्मूर्तये।
श्रीवाणीविलसद्वचः स्तुतिमते श्रीशैलसिंहासने
देवेन्द्रामरपूजिताय भुवनाधीशाय तुभ्यं नमः।।

कलिका

अपि च मुनिजनमनोऽहंकाररूपाय
विपुलमणिकटकपरिवृतहेमचापाय
त्रिपुर(पुर) दहनसंश्रितकालनेत्राय
चपलनयनार्थसंश्रयदिव्यगात्राय
दिवसकरहिमकर प्रविमलापाङ्गाय
नवसुधारसरसार्णव विप्रसङ्गाय
करकलितशूलसंक्षपित प्रतिवीराय
उरगपतिकटक विस्फुरितकेयूराय।।

उत्कलिका

भवभीतमुनिनाय
क विभूतिकरसाय
क मनोहरविधाय
क महेन्द्रवरदाय
क लसद्गुणविधेय...
बलदानवाजेय
नुतदिव्यरूपाय
हृतपुष्पचापाय।।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

कपाले भिक्षान्नं कलयति जगत्कण्टकरिपुं
सुपावं सङ्ग्रामं क्षपयति समस्तश्रुतिवरः।
कृपादृष्ट्या धन्यं कृपणमकरोच्छ्रीनगपतिः
प्रपद्ये तस्माद्यप्रतिमसुखसम्पत्तिमनिशम् ।।

कलिका

अपिचान्धकदनुजाधिपहरणा-
दपगतकर्ममहामुनिचरणा-
दपि हिमकरसंयुतघनजूटात्
वरहेमद्युति हर्म्यसुकूटात्
वरपुण्यमनोहरनिजरूपात्
स्मरफल----- धरुपमपातात्
(पादलोपः)

उत्कलिका

हतमदसिन्धुर
प्रतिबलबन्धुर
महितजटान्तर
सहितदिगन्तर
सुररिपुभञ्जन
तरुणीरञ्जन
परमदयालात्
निरुपममहेलात्

In Public domain. Digitization Muthulakshmi Research Academy

षष्टीविभक्तिः

पटहे पङ्कजलोचनश्रुतिधरा बर्हिर्मुखाः पद्मभू-
र्घटितस्तालधरत्वमज्जनदिवौकत्पातदावाशिनौ।
पटुवीणामृदुवादिनी सहतपब्राह्मीवृषोमर्दले
नटनं श्रीगिरिनायकस्य करुणानन्दास्पदं सर्वथा।।

कलिका

अखिलभक्तजनवतंस रिपुजनोष्णकरकरस्य
विपुलजलधिलोकनस्य विस्मृतैकजलधरस्य
सरसहृदयसरसविचर चारुहंसनायकस्य
भरितहिमसमग्रहेमभव्यदिव्यगायकस्य
तपितहृदयशिशिरसमयतरुणिघृणिसमागमस्य
जपितमुनिमनःप्रसन्नसन्नतक्रियागमस्य
श्रिगीरिप्रसन्नहर्म्यसेवनैकभावनस्य
भोगिभोगरत्नदीपभुवनभवनपावनस्य।।

उत्कलिका

दिवसकररुचिरनिजकर
पवनसखदिविजगणसं-
करकलितकुसुमपरिधृत
चरणसरसिरुहपरिणत
सुरदनुजमनुजमुनिगण
दुरितपरिहरणचरणगुण
कमलजमुखविनमितस्य
कमलनयनसन्नुतस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

देवे देवेन्द्रचित्तस्थिरनुत विलसच्छ्रीगिरौ नत्प्रभावे
भावे कैवल्यसत्त्वे प्रकटगुणगणस्फारसंसारपारे।
भावातीतद्विजेन्द्रप्रकटशयसौभाग्यकृष्टार्थवामे
भावज्ञे चन्द्रमौलौ परिणमति मनः प्रस्फुरत्योरुलिङ्गः।।

कलिका

अपि च गजासुरहरणविनोदे
कपटवटक्रमकारितवादे
दुरितभयङ्कर तुहिनकराङ्के
परमदयाकर परिहृतशङ्के
सरसिज भवमन्तक करधारे
निगमसरसि सन्निहित सुरूपे
सगुण निर्गुण संश्रयबहुरूपे (अत्र पादः लुप्तः)।।

उत्कलिका

मौलिसुन्दर
हेलामन्दिर
गङ्गालङ्कृत
भृङ्गीझङ्कृत
कलहंसीरथ
पुलिनमनोरथ
कलनविहारे
ललितोदारे

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

श्रीमश्चन्द्रकलाकलाप! महित श्रीशैलचूडाङ्क! ना
नामाधुर्यगुणैकधाम परमानन्दस्फुरद्रूप सु –।
त्रामालङ्कृति पादपङ्कज पठितृस्तोत्र सत्पात्र गं-
गामौलि विजयोऽस्तु ते त्रिभुवनक्रान्तैककीर्ते शिवा ।।

कलिका

अपिच विद्युत्प्रभायित बोधहृद्दीप
विपुलाधिभूतसंवृत विराण्मयरूप
लिङ्गसङ्गतपीठलीनसूक्ष्मशरीर
मङ्गलायत महामायात्म संसार
यजनादिषट्कर्म यमिकतानुष्ठान
रजताद्रि मुखमनोरम्यकेलीस्थान
दूरीकृतव्रातदुरितदुःखव्रात
गौरीमनोहराकार भावातीत ।।

उत्कलिका

श्रीपर्वताधीश
पापरूपविनाश
किन्नरेश्वरमित्र
सन्नतोज्ज्वलगात्र
नन्दीशवरयान
बृन्दारकानून
शैवाभिरतयोग
भावमयगत राग

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

नित्यस्त्वं कलये भवन्तमभवं नेता विधाता त्वया
स्तुत्या यश्रुतिमौलिभिः कृतिरियं तुभ्यं प्रसन्नात्मनः।
प्रत्यारञ्जगतोऽजनिस्त्रिभुवनः ब्रह्मादयो देवता
भृत्यास्ते त्वयि मन्मनः कलयते श्रीशैलसिंहासनः।।

*****

In Public domain. Digitization Muthulakshmi Research Academy

तिरुमलाचार्यकविविरचितम्

चिक्कदेवरायोदाहरणम्

मैसूर् महाराजवंशे अग्रगण्यः, कविपण्डितःअस्ति चिक्कदेवरायः। एनं महाराजमधिकृत्य रचितमिदं काव्यं तन्नाम्नैव चिक्कदेवरायोदाहरणमिति प्रसिद्धिं गतम्। चिक्कदेवरायस्य कालः 1704-1732 । अस्यास्थाने चिक्कुपाध्यायः, तिरुमालाचार्यः इति कविपण्डितौ आस्ताम् । अनयोः उदाहरणमिदं तिरुमलाचार्येण रचितमिति ज्ञायते।

इदमुदाहरणं निडदवोलुमहाशयस्य उदाहरणवाङ्मयचरितग्रन्थादेव स्वीकृतम्। तेन महाशयेन मद्रास् प्राच्यलिखितपुस्तकभाण्डागारस्थ तालपत्रप्रतिम् (1611) आधारीकृत्य लिखितम् इति तत्रत्योल्लेखैः ज्ञायते। ग्रन्थान्ते कवेः विषयाः नोपलभ्यन्ते। एवमेव ग्रन्थे तत्र तत्र ग्रन्थपाताः अपि दृश्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयति मदनरूपश्चारुकीर्तिप्रतापः
सततरचितरङ्गस्वामि सेवानुषङ्गः।
समदरिपुविभेदी सर्वविद्यानुमोदी
महिसुरि चिकदेव क्ष्मापतिर्भव्यभावः।।

कलिका

अपि च नृसिंह समर्चनशीलि-
श्चपलेतर वर सदवनलोलः
पापविदूरित पावनकीर्ति-
श्चापविदारित शात्रवमूर्ति-
श्शमितोद्धत खलजनसम्भूति-
श्शमसुर भूसुर सात्कृतिभूति
स्समिदुद्भटभट सदयस्वान्त
स्सम संशिक्षित सकलाशान्तः

उत्कलिका

गुरुतरधैर्य
स्थिरमतिधुर्य
स्फुरदुरुतेजः
परममहीजः
कवनीयगुण-
स्तववाक्यचणः
स्तुत धर्मगुणः
कृतभूरिरणः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

प्रत्यर्थिक्षतजापगावशपति त्यक्त्वा यशःकैतवा
गङ्गा श्रीचिकदेवरायमगमज्जन्ये निवासं पितुः।
श्रीश्चालिङ्गति तेन बाडबमिषक्रोधाग्निना शार्ङ्गिणा
पीतं द्विन्महिळाश्रुभिस्स्वपितरं सम्पूरयन्तं मुदा ।।

कलिका

अपि च बन्धुरभर्महर्म्यसञ्चारिणम्
स्वपदनम्रनृपालजालशुभकारिणम्
धात्रि प्रजानन्ददायिसम्पद्धरम्
पात्रदानप्राप्तपरमपुण्याकरम्
चञ्चलद्विपकर्ण चालिताम्भोधरम्
पञ्चबाणविधूतभामा (मनोहरम्)समादरम्
पञ्चाननावार्य पटुशौर्यमण्डनम्
चञ्चन्मदाटोप शत्रुराट् खण्डनम्

उत्कलिका

मदवारियुक्त स-
म्मदकारि दन्ति सं-
वलदश्वयोधसं-
कुलघोरयुद्ध सं-
गतशत्रु रक्त रं-
जितभूमि भातरं-
गयुतचापोज्ज्वलम्
नयनधूतोत्पलम्

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

ये भूपाश्चरणं भजन्ति कृतिनो दत्ताखिलोपायना
ये भूपाश्चरणं भजन्ति सहसा निर्वक्रदोर्विक्रमाः।
ते सर्वेऽपि यथोचितक्रमविदा श्री चिक्कदेवावनी
भर्त्रा भोगभुजो भृशं विरचिताः स्वस्थान एवाद्भुतम् ।।

कलिका

अपि च रिपुचरित्रगात्र हारिभूरि सिन्धुरेण
निपुण कृपण लोकशोक निरसनरसबन्धुरेण
विमल कमल पत्रमित्र विपुलचपललोचनेन
कुमत विमत पत्र चित्र घोरनीरसेचनेन
चरण शरण वीरवार जात शीत वीक्षितेन
भरित चरित पुण्य गण्य भाति भूतिलक्षितेन
विहित महित युद्ध शुद्ध विदित गदित धीग्रहेण
सहिम महिम सान्द्र चन्द्र साम्य रम्यविग्रहेण

उत्कलिका

रूपविजित वीरसेन
भूपतनय भीमसेन
तुलित महित भूरिसेन
चलित समद शत्रुसेन
जवहृतस्मयोद्गमेन
जवनहय तुरङ्गमेन
नियुतनियत बन्धुरेण
नयकला दुरन्धरेण

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

स्वस्ति ----------------- श्री चिक्कदेवक्षमा
भर्त्रेमन्नेरगण्ड मन्नेरविभालाङ्काय भोभूयताम् ।
द्वानेजाङ्कुश मर्तुभाङ्कमकरक्षोणी वराहध्वनत्
भेरी सिंहललाट मुख्यबिरुद भ्राजिष्णवे जिष्णवे ।।

कलिका

अपि च नूत्नरत्नखचित हर्म्यरचित तोषणाय
विपुलतर समस्तदान विहितलविबुधपोषणाय
भूमिपाल मौळिमणिविभूषिताङ्घ्रिसायकाय
सामभेददण्डनीतिसाधितारिनायकाय
कुलधराधराभिरामकुञ्जरेन्द्रजालकाय
विलसिताननाब्जभृङ्गविभ्रमप्रदालकाय
पर्वचन्द्रचन्द्रिकाविभासिकीर्तिमण्डनाय
सर्वदेवतावितानसन्नुतारिखण्डनाय

उत्कलिका

समरसमयविहितमाय
विमतकुमतराडपाय
करणपटुतरोग्रसाय
करणकरणचणदुपाय
फलितमहितजयनिकाय
विलसदतिमनोज्ञकाय
कलितविविधभूषणाय
ललितसर भाषणाय

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

राजश्री चिकदेवपार्थिवमणे वीरप्रतापाष्टदि-
ग्राजव्रातमनोभयङ्करमहाराजाङ्कराराजतः।
राजाद्युत्परमेश्वराङ्गघननाद्राजाधिराजाङ्कना
दस्त्यंतेऽम्बरगण्डचण्डबिरुदानान्यो वदान्यो नृपः।।

कलिका

अपि च योषामनोहारि सौन्दर्य त-
स्तवनीयमयधराधरभूरिधैर्य त –
स्तरणिनन्दनविनिन्दनमहौदार्यत-
स्सरसलोकैकरक्षणकार्यधुर्यत-
स्सकलसंसदुपास्यसारसौजन्यतः
पुनरुल्लसितदेव भूदेवमान्यतः
कनदुरुक्रमपराक्रमचक्रमान्यतः

उत्कलिका

शतधृतिमत्या
धृतघनसत्या
दररणकृत्या
दरभटमत्या
द्भुतपरमाया
दितिसदुपाया
दिमगणनीयात्
दममहनीयात्

In Public domain. Digitization Muthulakshmi Research Academy

षष्टीविभक्तिः

राजश्री चिकदेवरायनृपतेः सर्वो विपक्षक्षमा-
भृद्वर्गः किमभङ्गसङ्गर हितोद्योगस्सपक्षोऽजनि।
अहनायादपतत्कथं नु नदिवं नोचेदुदग्राग्रहा
दभ्येत्योत्कटपादघट्टन चलत् सर्वं सहा मण्डलः।।

कलिका

अपि च विक्रमार्कशक्रहारिभूरिविक्रमस्य
कपिवरध्वजातिचित्रकरशरासनश्रमस्य
कुण्डलीन्द्रदर्पजलधिकुम्भजद्भुजायुगस्य
चण्डभानुमण्डलप्रचण्डभयदसंयुगस्य
चन्द्रभानिभासमानचामराळिवीजितस्य
सान्द्रचन्द्रमिलितगन्धसारहृदयरञ्जितस्य
गण्डमण्डलाभिरामगण्डगन्धसिन्धुरस्य
कुण्डलप्रभाविभासि कुन्तलालि बन्धुरस्य

उत्कलिका

विदितशास्त्रसद्रहस्य
गदितनाटकप्रशस्य
मानजयरमानमस्य
माननिजभुजायुगस्य-
नन्तवैभवार्जितस्य
मन्तकमणिकृतवयस्य
भावरत्न कुण्डलस्य
धावितारि मण्डलस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

जङ्घाल–मिकाविशृङ्खलमिळत्पुङ्खानुपुङ्खापत-
त्कंखाणोग्रखुराग्ररेणु पटलाक्रान्ताखिलाशान्तरे।
श्रीर्दे---------- त्सला विरहता मापुष्पवत्तारकं
---------------------------------- ।।

कलिका

अपि च सामन्तराडभयप्रदायके
विपुलदोस्सारगर्वितदण्डनायके
श्रितजनस्वान्तवारिजलोकबान्धवे
ततविजापुरपुरन्दरदत्तसैन्धवे
बरिगोलुकोण्डराट् प्रार्थितानुग्रहे
गलितोग्रचोक्कलिङ्गमनायकाग्रहे
शिथिलीकृते केरियसिंहासनोच्चये
श्लथविरोधिनृपालशौर्यधैर्योदये

उत्कलिका

हितचर्य भूसुरे
रित वाक्यसादरे
हितकारि शैलजे
शततभूतिव्रजे
दिति साम्परायके
लित तिम्मनायके-
ष्टजनतानन्दिते
त्रिजगती वन्दिते

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

पित्रोः प्राप्तयशाः फलं मृगदृशामत्यर्थमक्ष्णःफलं
भ्रातुः पुण्यफलं विशां जनिफलं युक्तेः फलं मन्त्रिणां।
अस्माकं वचसां फलं प्रवचसां त्वां तर्कयामोदयं
वीर श्रीचिकदेवरायनृपते तेजोभिरह्नां पते।।

कलिका

अपि च दिव्याहारहारि सुव्याहर
कुपितवैरिविदार घोरशैर्योदार
बहुसुतद्विजमान्य पालक्रममान्य
महनीयराजस्य मौलिनुतसौजन्य
चतुरमन्त्रिनिकाय शम्बराहितनाय
तत सज्जनविधेय दानजितराधेय
निजबान्धव निधान नीतिकार्यविधान
रजनि राडसमान राजिततद्युतिमान

उत्कलिका

समदसामजराज
वितुलशुण्डाराज
दतुलबाहाटोप
दितिनिजप्रतिभूप
दलितभास्कर—
गलित—डंब
रा—द्यच्चौर्य
पावनस्तुतचर्य
यो भूद्रक्षति यं च येन यो यस्मै दधानःश्रियो
यस्मान्नाधिक मेतिभर्तुमखिलं य--------- ।
आचन्द्रार्कमवक्रविक्रमभरैर्यश्चक्रवालं मुदा
---------- पालय चक्रमेवसुमतीं श्रीचिक्करायप्रभो ।।

In Public domain. Digitization Muthulakshmi Research Academy

कालीपट्नपु सिद्धरामकविविरचितं
मल्लिकार्जुनस्तवोदाहरणम्

"मल्लिकार्जुनस्तवोदाहरणं" श्रीकालीपट्नपु सिद्धरामकविमहाशयेन रचितम्। अस्य कवेः विषयाः पूर्णतया नोपलभ्यन्ते। डा. पि.श्रीराममूर्तिमहाशयस्य **Contribution of Andhra to Sanskrit literature** इत्यस्मिन् ग्रन्थे सिद्धरामकवेः प्रस्तावना ईषन्मात्रेण दृश्यते (पृष्टसंख्या 161)। इदमपि काव्यं निडदवोलुवेङ्कटरावस्य उदाहरणवाङ्मयचरित ग्रन्थादेव स्वीकृतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयति चलदपाङ्गक्षोभितस्वात्मबिन्दुः
प्रभवदमितमायामात्रविश्वप्रपञ्चः।
अगणितगुणधीसंसृष्टिमूलात्मभक्तिः
प्रकटितनिजतत्त्वः श्रीगिरीशः परेशः।।

कलिका

अपि च शिलादमहर्षि तनूज वृषानुजपर्वतमूर्तिनिवेशः
त्रिपुटिवाहशिवाद्वयसंवित्तप्तशरणजनितसुसङ्काशः
शरणरसालमहीरुहरूढविषयकिसलयभुक्कलपिकवर्यः
चरगुरुलिङ्गत्रितयनिजाकृतिसरससपर्याग्राहकधुर्यः
दशमीसारविवेकमहावाक्तत्त्वविदुर विश्रामदसीमा
पशुपाशभित् परगुरुपदरसपानगणोडुव्रजसितधामा
स्फारमनोन्मन्मूर्ध्यनिरामयधामा

उत्कलिका

परशिवदेशकभावाकर्षित
चरमस्थानगताब्जमागत
वरभक्तमनःप्राणसमन्वय
करणविषयधातुकसकलेन्द्रिय
विलसितषट्कमलान्तर्व्यापक
सललितनाडीमण्डलदीपक
भरितषडक्षरमनुन्मात्रः
करतलसन्दर्शितचिन्मित्रः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

ब्रह्माण्डामितरत्नकन्दुकबृहत्खेत तटित्सन्निभा
नादारावमयी शिवात्मक कला या भ्रामरीचित्प्रभा।
यं भान्तं सहजैक्यता मनुगमत्तं चन्नमल्लेश्वरं
वन्दे श्रीगुरुलिङ्गजङ्गमतनुं भक्ताङ्गभोगाङ्गकम् ।।

कलिका

अपि च मायातमिस्रातीत चिद्रविं-
कपटभेदवचोद्रिखण्डननिशितपविं
कमलजाण्डव्रजाक्रमणैननिजपदं
अमृतात्मिकाढ्योभयत्रिपात्सम्पदं
कामयमषड्विधविकारोर्मिनाशकं
व्यामोहलसंवित्ततत्त्वदेशिकं
सौरमण्डलमध्यजाम्बूनदाकृतिं
चारुदीपशिखाभचरमनादस्थितम्

उत्कलिका

हरिधातृवृत्तसंहरवरुणराक्षसाम्बरचरं
नैर्ऋतिकिन्नरशीतकिरणधनञ्चय विबुधयक्षसञ्चय
दैत्यनिधिपशङ्कराशेषपरिवृतं करुणारसामृतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

नक्षत्राग्निरविक्षपाकरतटिन्मुख्यप्रभा हेतुना
नादातीतचिदम्बरेण परमानन्दस्वरूपात्मना।
ओतप्रोतयुतं शिवादिधरणीपर्यन्ततत्वात्मकं
व्याप्तं श्रीगिरिमल्लिकार्जुनमहादेवेन सर्वं जगत् ।।

कलिका

अपिच भक्तदृक्करान्तराम्बराढ्यचिद्दिनकरेण
तपनबिम्बमध्यपुरुषदहनकुहरभास्वरेण
प्रमथरुद्रजननमूलभक्तिगुरुपदेन
शमितबिन्दुचलनभक्तिसमरसप्रमोददेन
विद्वरिष्टकाशिनाथ वीरभद्रगुरुवरेण
विद्वदीडितोद्भटार्यवीरवरगुहेश्वरेण
अमलपरमनात्मवसुधावगाहतोषणेन
कमलजाण्डनिकरनाशकरणमृत्युभीषणेन

उत्कलिका

नेतरदृप्रकृष्ट
नेतिवाङ्निषेधशिष्ट
सकलकरणविषयदूर
विकृतनामरूपसार
वेदवाङ्मनोतिरिक्त
भेदवादतर्कयुक्त
परमकारणेश्वरेण
परमपदविभास्वरेण

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

व्यक्ताष्टावरणाष्टकीलदृढपञ्चाचारसंयोजितं
वेधा शैवमनुप्रिया त्रितनुकोणादित्रिदीक्षावृतम्।
लिङ्गं दास्यति चित्कलामयमसौ शिष्याय यद्देशिकः
तल्लिङ्गात्मक मल्लिकार्जुनमहादेवाय तस्मै नमः।।

कलिका

अपि च चित्स्वरूपसिन्धुविलयदब्जजाण्डशीकराय
सुपथपथिक भक्तहृद्विशुद्धपद्मदिनकराय
क्लेशपञ्चकानुबन्ध कृतकभवविनाशनाय
कोशपञ्चकातिरिक्तकृतिहृदयनिवेशनाय
अमलविद्वदेकवेद्य हंसतत्त्वमात्रकाय
विततकृत्यपञ्चकाढ्यविलयमूलसूत्रकाय
अन्दितप्रपञ्चदर्शनात्मजनविधेयकाय
बन्धमोक्षहरनिजैक्यभक्तियोगदायकाय

उत्कलिका

अधरषट्प्रयोजसार
विधुदिनेशमार्गदूर
मस्तकाग्रकलितकमल
शस्तरन्द्रचन्द्रविमल
तरसुधार्द्रगगनरूढ
परनिजैक्यभावगूढ
तत्त्वविदविखण्डिताय
खत्वमात्रमण्डिताय

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

बालब्रह्ममहेश सिद्धपुरचिद्भृङ्गाग्रपञ्चस्थलो-
त्तीर्णोदीर्णसुवर्णशृङ्गवसतेश्चाष्टाङ्गविद्विग्रहात्।
षल्लिङ्गाङ्गविलासिनी भ्रमरिकाज्योत्स्नासुधा दीधितेः
श्रीचन्नप्रभुमल्लिकार्जुनविभोरन्यं न जानीमहे ।।

कलिका

अपि च दुर्ग्रहमायिकान्वयविदाहकात्
कृपणदनुजावेशकितवजनमोहकात्
परमनिर्वृतिमद्विपश्चिद्विभावितात्
स्थिरतर निजानन्दसिन्धजनसेवितात्
एकाङ्गिलिङ्गसाहित्यचिद्भावनात्
शोकमोहविदूरसुजनहृज्जागरात्
तरलितैकोत्तरशतस्थलव्यापकात्
चरमोपनिषदर्थसंविदध्यापकात्

उत्कलिका

फणिभवनगाङ्गवन
कणसुधाशरधिघन
शृङ्गमुखपञ्चकाभङ्ग
निजमञ्चको-
त्सङ्गतलविहरण
स्वाङ्गगभ्रमरिणी
वागान्तराशया -
द्योगीड्गुहाशयात्।।

In Public domain. Digitization Muthulakshmi Research Academy

षष्टीविभक्तिः

ज्ञानेन्दुप्रभवां विमुक्तरजनीविस्फारिणीं चिन्मयी
काशोत्फुल्लनिजप्रभां परमहानन्दोल्लसच्चन्द्रिकाम् ।
यन्नित्याद्वयभक्तियोगरसिकाः पश्यन्ति मुक्तश्रमाः
तस्य श्रीगिरिमल्लिकार्जुनमहादेवस्य दासोऽस्म्यहम् ।।

कलिका

अपि च परममोक्षलय
विपश्चदेकतानतस्य
परनिजत्वताविबोध
पण्डताप्तकामितस्य
अङ्गलिङ्गविलय
निष्कलाह्वयस्थलात्मकस्य
शृङ्गदर्शनप्रबुद्ध
सिद्धमुक्तिदायकस्य

उत्कलिका

हरनमः पदेरिताङ्ग
भरितशिवपदोक्तलिङ्ग
महादयोतिकलितवाक्य
महितजीवपरशिवैक्य
बोधमन्त्रलक्षितार्थ
साधुकामितप्रबुद्ध
गम्यमानहरपदस्य
साम्यरहितनिजपदस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

स्वांशान्वीतषडङ्गयोजित कलासादाख्यसङ्घावृतं
स्वाचारादि महाशिवान्तवरषल्लिङ्गव्रजं लीयते।
यत्सर्वोत्तरसत्यचिद्घनमहानन्दस्वलीलस्थले
तस्मिन् श्रीगिरिमल्लिकार्जुनमहादेवे विलीनोऽस्म्यहम् ।।

कलिका

अपि च स्वाङ्गकभक्तमनः प्राणैकोद्भवचिल्लिङ्गज्वलने
निपुणस्वांशचतुर्युगमठगुरुनिर्दिष्टोत्तरशैवोज्ज्वलने
तप्तायःपिण्डस्याऽद्वयविलयीकृतभवतोयकणे
सप्तदशदृढग्रन्थीकृतसूक्ष्मतनुध्वंसनकरभक्तगणे
उरुषट्त्रिंशद्विशतोत्तरषोडशनिजमिश्रमुखे
स्थिरकायकरणभावार्पणविविधग्रासोत्थसुखे
स्फारतुरीयातीत निजान्तः प्रविलीकृत विस्मृति जगदण्डे
चारुप्रभदीपावृतचित्पिण्डे ।

उत्कलिका

परमशिवोऽहं भावगचिन्मय
परविश्वस्फुरणात्मधनञ्जय
हृद्यकरणसम्मिलदनवद्य
जगद्भवितातवहास प्रथित
शिवाद्वय भव्यमहाध्वरकथिते
दन्ताहेममहाभवदीक्ष
विपश्चित्तनुतावासे
वीक्षणजाखिलभुवनग्रासे ।

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

न ज्ञातं भवदन्यमीषदपि विज्ञातं त्विदं तन्मयं
सुज्ञातं गुरुलिङ्गजङ्गममहारूपं त्वदाविष्कृतम्।
त्वं मे स्वात्मजगद्ब्रमं परिजहि त्वद्दीपकर्पूरतां
याचे श्रीगिरि मल्लिकार्जुनविभो देवो ममामुं वरम् ।।

कलिका

अपिच स्वस्थौघ्यस्वांशांस्य तृप्तजगत्त्रय
विपुलनिरहन्ता प्रविषकिङ्करगोत्र
गगनेन्द्रचापसङ्काशचरणस्वैक्य
निगमविद्गुरुरूप निगदित महावाक्य
मूलमनुकार्मुक विमुक्तात्मशरलक्ष्य
कीलितानिमिषदृक्कङ्कणव्रजवीक्ष्य
ज्ञानसूर्योदयविषयसुप्तनिजभक्त
गानसञ्चरदात्मगायकसु(न)व्यक्त

उत्कलिका

यमनियमनसुजय
शममुखगुणप्रचय
करणविषयाक्ष
शिवकरणकरणप्रभव
निश्चलसमाधिग
विपश्चिदुरुभावग
विबोधयोगविमृग्य
साधुसन्नुतयोग्य

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

लिङ्गं ये प्रणमन्ति यं गुरुवरं येनावृतं जङ्गमं
यस्मै मत्सुकृतिर्युतस्तदिह न ज्ञातं जगत्प्राकृतम् ।
यस्यांशे महतीन्द्रिये परशिवे यस्मिन् जगल्लीयते
तद्यच्छ्रीपतिमल्लिकार्जुनविभो मां मोचयाज्ञानतः।।

श्रीमच्छ्रीपतिपण्डितप्रभुवरः श्रीकाशिनाथाह्वयः।
श्रीवीरेश्वरहस्तजातशरणोऽसौ सिद्धरामाह्वयः।।

श्रीमच्छ्रीगिरिमल्लिकार्जुनविभो संरर्चतेरर्पयेत्।
श्लाघ्योदाहरणं शिवाद्वयविदां हृद्यं चिदानन्ददम्।।

सिन्धौ बुद्बुदवज्जले लवणवत्कर्पूरवत्पावके।
भक्तोऽसौ विलयं गतो गुरुपदे यस्सिद्धरामाह्वयः।
कृत्वोदाहरणं समर्पयदिह श्रीपर्वतेन स्वयम्।
श्रोतार्तस्त्विदमाप्नुवन्ति शिवतां तीर्त्वा भवाम्बोनिधिम् ।।

आवाच्यात्मस्वरूपाय शिवभावप्रदायिने ।
नमः सद्गुरुनाथाय षट्थ्सलब्रह्ममूर्तये ।।

जयति परमशैवाद्वैततत्त्वप्रबोधः
द्युमणि वरहितात्मा छात्रमायान्धकारः।
स्वहिमकरविजृम्भो देशिकेन्द्रोद्भटार्यः
प्रथितकुलसमुद्रो वीरभद्रः कृपार्द्रः।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीभाष्यं विजयसारथिमहाकविना विरचितम् उदाहरणचतुष्टयम्

श्रीभाष्यं विजयसारथिः

महाकविः, महामहोपाध्ययः श्रीभाष्यं विजयसारथिमहाशयः गोपमाम्बा नरसिंहाचर्य दम्पत्योः तेलङ्गाणाराज्यस्थ करीन्नगरमण्डले इन्गुर्तिनामकग्रामे 10-03-1936 तमे दिनाङ्के जनिम् अलभत।

कविरयं मातामहस्य सकाशे तर्कवेदान्तादिशास्त्राण्यध्यगीष्ट।। पालकुर्ति ग्रामस्थ सोमेश्वरनारसिंह वेदसंस्कृतपाठशालायां ततः श्रीविश्वेश्वर संस्कृतान्ध्रकलाशालायाञ्च विद्याम् अभ्यस्य विद्याप्रवीणादि परीक्षासु उत्तीर्णतामगमत्। विजयसारथिमहाशयस्य प्रतिभां वीक्ष्य कलाशालायाः पालकवर्गसदस्याः तस्यां कलाशालायामेव 1956 तमे वर्षे अध्यापकपदे नियुयुजुः। तत्रैव चत्वारिंशत् वर्षाणि यावत् अध्यापकपदविभूषिताः एते महाशयाः नैकान् उत्तमान् शिष्यान् विनिर्ममे।

बिरुदानि

श्रीभाष्यं विजयसारथिमहाशयः भारतसर्वकारेण 2020 तमे वर्षे प्रद्मश्री पुरस्कारेण सभाजितः।अपि च महाकविः, कविचक्रवर्ति, वाचस्पतिः, वश्यवाक् , राष्ट्रकविः, संस्कृतपदकविता पञ्चाननः, तेलङ्गानासंस्कृतकविसम्राट्, महामहोपाध्याय, प्रतिभावान् इत्यादिभिः पुरस्कारैः सम्मानितोऽयं महानुभावः बह्वीभिः संस्थाभिः।

ग्रन्थाः

श्रीभाष्यं विजयसारथिमहोदयैः नैकविधकविताप्रक्रियासु पञ्चाशदधिकाः ग्रन्थाः ग्रथिताः ते च

काव्यानि 1.मन्दाकिनी 2.शबरीपरिदेवनम् 3.कल्याणरामः 4.प्रवीणभारतम् 5.विषादलहरी 6.चन्द्रशेखरप्रशस्तिः7.अनुशीलनम् 8. आवाहनम् 9. आवेदनम्

देशभक्तिसाहित्यम् 1.भारतभारती 2. राष्ट्रगीतम् 3.क्रान्तिगीतम् 4. शङ्खारावः 5.शारदापदकिङ्किणी 6.भारतजागृहि गीतम्

In Public domain. Digitization Muthulakshmi Research Academy

सूक्तसाहित्यम् 1.उषस्सूक्तम् ,2. रूपसूक्तम् , 3. कविसूक्तम् ,4. कौलेयसूक्तम्,5. राष्ट्रसूक्तम् ,6. शिवसूक्तम्

मालिकासाहित्यम् 1.शिवताण्डवम् 2. हर जयोऽस्तुते 3.शारदासाक्षात्कारः 4.श्रीरामायणमालिका 5.श्रीगुरुमालिका

उदाहरणसाहित्यम् 1.वेङ्कटेश्वरोदाहरणम् 2.श्रीरामोदहरणम् 3.श्रीरामानुजोदाहरणम् 4. श्री रघुनाथदेशिकोदाहरणम्

सङ्गीतसाहित्यम् 1.रासकेलिः 2. सङ्गीतमाधवम् 3. रासलीला

अनुवादग्रन्थः 1.गीताञ्जलिः

तेलुगुविमर्शग्रन्थाः 1.संस्कृतरुपकेषु नान्दी प्रस्तावनाः 2.न्यायवैशेषिकौ - सांख्ययोगौ 3.संस्कृतवसुचरित्रसमीक्षा 4.सृष्टिदर्शनम् 5.पूजादर्शनम् 6.प्रहेलिकाः 7.प्रवल्हिकाः 8.श्राद्दतत्वम्

एवमेव देवतास्तुतयः, एवं विभिन्नक्षेत्रस्वामिसुप्रभातानि ,एकाङ्किकरूपकाणि, नवलाग्रन्थाः (गद्यकाव्यानि)

उदाहरणसङ्ग्रहाख्ये अस्मिन् ग्रन्थे श्रीभाष्यं विजयसारथिमहाकविविरचितं उदाहरणचतुष्टयम् प्रकाश्यते।

******

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामोदाहरणम्

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयताच्चारुशिरीषपेशलवपुस्संसारवाराशिनौ
स्स्वयमाविष्कृततत्तदाकृतिमहस्सन्धानमर्मैकवित्।
दयमानानुपमानमानहृदयो धर्मप्रियो मैथिली-
प्रिय ईशान पितामहादि विनुतश्श्रीरामचन्द्रप्रभुः॥

कलिका

अपि च सकलजगज्जनावन निपुणमायामनुजरूपः
अपरिमित बलसाहसोत्सादि सम्पूर्णस्वरूपः
कुशिकसुतकृत सवननाशन कुटिलपलभुङ्निवहहन्ता
वशशिखामणिदार शापनिवारणाद्भुतशक्तिरन्ता
सकल नृपचयभयद शाम्भव चापखण्डन लब्धकीर्तिः
विकलजनक मनोनुरञ्जन विविधगुणमणि पूर्णमूर्तिः
जनकजा ललना मनोहरचारुलावण्याभिरामः
अनुपहतनिज बलपराजित घनरुषागत परशुरामः

उत्कलिका

परमहितगुहहृदयरञ्जन
परमहर्षि मनोनिगुञ्जन
मुनिमनोहररूपसुन्दर
दनुजदलनिधिमथनसुन्दर
विनतलक्ष्मणपर्युपासित
मुनिवरोचितवेषभासित
महित गौतमविनुतचरितः
सहज सौजन्यादिभरितः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

सुमनश्चातकमोददं जनकजा सौदामिनी मानितं
समनः केकि विलासदं वरकृपासारामृतस्यन्दिनम् ।
समदारुंतुद गर्जितं शुभकरं शार्ङ्गेन्द्रचापोज्ज्वलं
कमनीयं रघुरामवारिदमिलाक्लामापहं भावये ॥

कलिका

अपि च खरदूषणाद्यरिनिकरमारणं
सपदितापसलोकसन्तापवारणं
कनकमृगरूपधरकर्बुर भयङ्करं
हनुमदर्कतनूज हरिहृदभयङ्करं
अभियातिनेम बलहरवालिबर्हणं
हनुमदानीतभार्यावृत्ततोषितं
विनतसागरराजविनुतमणिभूषितम्

उत्कलिका

कृतजलधिसेतुपद
नतविभीषणवरद
विधुतकपिबलघोष
बधिरीकृताशेष
ककुबन्तराल, लय
विकटरुद्रातिभय
करवीर्यराजितं
सुरराजपूजितम्

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

ललिते यस्य विशालकुक्षिकुहरे ब्रह्माण्डजालं क्वचित्
जल विस्फोटसमं विभाति गिरिभिच्छर्वाजमुख्यास्सुराः।
जललेशा इव सन्ति राजतितरां संसारमाया क्वचित्
जलधारेव च तेन रामविभुना संस्पर्धते कोऽमुना ।।

कलिका

अपि च सबलकुम्भकर्णकादिदानवार्दनेन
कुपितकुटिलरावणादिघोरदनुजमर्दनेन
विनतमौनिसुरनरादिविविधसुजनसन्नुतेन
अनलशुद्धजनकजामहासतीसमञ्चितेन
स्वकवियोगभेदभरित भरततापभञ्जनेन
विकचनयनविकचहृदयविविध मनुजरञ्जनेन
ललितरीतिनिगमनीतिलालनैकभासनेन

उत्कलिका

मदनमदनमुग्धरूप
विदुरविदितसुस्वरूप
दलितदिविजविविधताप
मलिनचरितविहितकोप
धृतजगद्विरोधिलोप
हृतदरिद्रतादिलोप
विकटविमतखण्डनेन
सकलनृपतिमण्डनेन

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

रामायामलमौनिचिन्मय पिकारामाय वर्षाम्बुद
श्यामायाप्रमितप्रमाय सुमनश्श्यामालिकामाय ते।
सोमास्याय सदा विताश्रित नत स्तोमाय सम्पद्गुण
ग्रामाय प्रतिपन्धि भीतिकर सङ्ग्रामाय नित्यं नमः।।

कलिका

अपि च वीरारिनिवहाभीलजन्याय
रिपुजनक्षमणातिरिक्त सौजन्याय
अकलङ्कचरितनृपनिकरसम्मान्याय
विकटसङ्गरवीर विसराभिमान्याय
सकलमानवलोकसमयैकधन्याय
विकच प्रभाहृतविविधनैर्धन्याय
अतिलोकगम्भीरतातिनैपुण्याय
सतत संसारपरिचर्यैकपुण्याय

उत्कलिका

अतिमोहनच्छाय
कृतजगत्प्रच्चाय
बुधरताभिप्राय
विधुतदुरभिप्राय
प्रदितजगदन्याय
विदितनिगमन्याय
घनताभिरामाय जनकजारामाय

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

पुरहूतानलदण्डपाणिनि कषापुत्रप्रचेतोमरु-
न्नरवाहप्रमथाधिपाम्बुभवभूनानासुरोपासितात्।
स्मरतातान्निखिलाण्डगोलभरणस्फायद्विशालोदरात्
नरसिंहात् जगदीश्वरात् रघुवरान्नान्यत् परं दैवतम् ।।

कलिका

अपिचावनिजाह्लादधुरीणात्
विपुलगुणोज्ज्वलविभवारीणात्
रविकुल जलनिधिराकाचन्द्रात्
अवितपितामह हरविबुधेन्द्रात्
अतिकोदण्डकिणाङ्कितबाहात्
विततपरार्चाविभवव्यूहात्
परम दयारसभरित दृगन्तात्
स्मरशत मोहन मञ्जिमकान्तात्

उत्कलिका

हनुमत्सेवित
मुनिसम्भावित
गिरिजोपासित
हरिचिद्भासित
भवभयवारण
भवसुखपूरण
जलदश्यामात्
कलुषविरामात्

In Public domain. Digitization Muthulakshmi Research Academy

षष्टीविभक्तिः

विश्वं यन्महसा विभाति विविध विभ्राजते यस्सदा
विश्वस्मिन् जगति प्रधानपुरुषं वेदास्तुवन्तिस्मयम्।
शश्वत्सम्मदमभ्युपैति सुमनोजातिर्यतश्श्रीमतो
विश्वामित्रहितस्य रामनृपतेर्वेवेत्ति कोवा गुणान् ।।

कलिका

अपि च वेदबाह्यदुर्णयाधिकारशोषणस्य
स्वपरभेदविरहसकलजन्तुकोटिपोषणस्य
सततसुजनतानपेतसकलसाधुसेवितस्य
विततनिगमनिगममौलिविविधसूक्तिभावितस्य
कठिनहृदयदितिजनिचयगहनवनदवानलस्य
शठनृपालतूलजालचरमदारुणानिलस्य
स्थिरतटिल्लतायुताति दीप्रशितिवपुःप्रभस्य
तरुणकिरणदुर्निरीक्षतरणिकोटिसन्निभस्य

उत्कलिका

स्तवसमर्हसुगुणनिचित
कविविरिञ्चनाभिरचित
पविधरामराभिगीत
लवकुशानवरतगीत
नवनवानुभावभरित
भुवनमङ्गलैकचरित
रविकुलाब्धिचन्दिरस्य
शिवहृदेकमन्दिरस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

परमुप्तासुगुणैस्सुमेरुकुधरं प्राप्ताजगन्मण्डपे
हरिदन्तर्विततता यशोमयलता यस्यान्तरिक्षं गता ।
परितः कोरकितोडुभिः कुसुमिता भातीन्दुना सर्वदा
वरदे रामपरात्परे स्थिरतराभक्तिर्मम द्योतताम्।।

कलिका

अपि च चारुतरवारिदद्युतिग्लपनधीरमुनिमोहनाकृतौ
जपतपोधृति समाधिवैभव प्रथितशक्तिपरमर्षि सत्कृतौ
त्रिविधचेतन परिग्रहाग्रहद्विविधभावकलनैकतत्परे
विविध मङ्गलगुणक्रियादियुग्विविधभूमविलसत्परात्परे
निगममौलि कुलनिश्चितामित प्रगति तत्वसुषमैकभूषणे
निगमदूरमति दुर्विधोद्यमान्वितमनस्कधिषणाभिदूषणे
ललितवीक्षित कृपासुधारसोल्लुलितचित्त नतभक्त हृद्यते
कलुषवृत्त मदखण्डन स्फुरत्कठिनशासननिभालनोद्यते

उत्कलिका

निशितधारकरवालकृत्तदुः
पिशितघस्मरसुराभियातिदुः
प्रसृतशोणितनिधौतधारिणी
कुसृतिरूपककलङ्क, पारणी
कृतनृपालकयशश्चरित्रक
प्रततकल्मषतालवित्रक
द्युतिशतावृत निटालभासुरे
सततरञ्जितविशिष्टभूसुरे

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

श्रीमन् राघवकूर्मपादनियतश्शेषावलम्बोद्यतः
भूमीपात्रयुतोऽब्धितैलभरितो भूध्रेन्द्रवर्त्युज्ज्वलः।
व्योमैकाञ्जनसंयुतो दिनमणिज्योतिस्समुद्योतते
ते मायावि तमोनिरासनपरस्तेजः प्रदीपस्सदा।।

कलिका

अपि च चूडालङ्कृतामूल्यकोटीर
सपदि मोदिततुराषाडजजटाटीर
सत्यसुन्दरशिवस्फाररूपोदार
यत्यमलभावनानृत्यत्कलोदार
नतदयामृतपूर रतदृशाकर्पूर
कृतिमानसविहार हिततापपरिहार
भृतविनतबृन्दार नतलोकमन्दार
कृतिसस्य केदार कृतकसवभूदार

उत्कलिका

श्रुतिमौलिनुतशील
हतदेवरिपुजाल
विततविष्टसमूल
धृतहेममयचेल
सितीसतीलोल
शीतांशुसमबाल
धामद्रुमावाल
रामावनीपाल

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

श्रीरामोदयतां पुराणपुरुषं श्रीरामचन्द्रं भजे
श्रीरामेण कृतं जगन्मम नमश्श्रीरामचन्द्रायते।
श्रीरामान्मुदमेमि सन्ततमहं श्रीरामदासोस्मि ते
श्रीरामे हृदयं विभात्वविकलं श्रीरामचन्द्राव माम् ।।

कलिका

अपि च परम मनुजमूर्तिरपहताश्रितामरार्ति-
रपजितामृतांशु कीर्तिरपगताचलाधिजूर्ति-
रमलहृदय विनुतीनीतिममरजयविधायिवीति-
ममितपरम सुषमजूतिममलचिन्ममस्तवीति
मरिमजनिम विरहितेन हरिमगरिमपरिचितेन
भरिम परिम समवितेन परमधरिमविलसितेन
सततमृदितकर्वराय समुदितातिं वर्वराय
अतिनिरस्तगर्वराय हतवियातशार्वराय

उत्कलिका

अविनबर्हिजलमुचोपि
सुवनकोटिसमरुचोपि
परमपदविराजितस्य
चरमपदसभाजितस्य
अगणितानवधिकधाम्नि
निगममहितपरमभूम्नि
भुवनभवनरासमान
सवनहवनभासमान
श्रीरामचन्द्रगुणमणिनिचितं सुवर्णमिदमनिशं जयतात्।
विजयसारथिरचितं पण्डितहृदयाभरणमुदाहरणम् ।।

******

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवेङ्कटेश्वरोदाहरणम्

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयति विनीलनीरधर चारुशरीररुचिर्महाकृपा -
श्रयहृदयः प्रपन्नजनरञ्जन मञ्जुलमानसःप्रभुः।
स्मयमददूरवृत्तिरतिशान्तरतो, वरवेङ्कटाचल -
प्रियवसती रमापतिररिष्टहरो जगदीश्वरस्सदा ।।

कलिका

अपि च मङ्गलदेवता हृदयाब्जमधुमाद्यन्मिलिन्दः
तपनकोटिद्युति निषेवित धाममयवदनारविन्दः
वेङ्कटाचलशिखरमन्दिरविहरमाणविलासमूर्तिः
किङ्करीकृतपङ्कजासनशङ्करादिकदिव्यमूर्तिः
भक्तनेत्रचकोरसन्ततिपर्वपूर्णशरत्सुधांशुः
भक्तहृदयाम्भोरुहाकरभासनोद्यतलोहितांशुः
मुक्तिकामुकनिजपदाश्रितयुक्तमानसराजहंसः
व्यक्ततेजोलवविधूतनिवातकवचविरोधिकंसः

उत्कलिका

कलियुगार्तोद्धरणदीक्षित
कलिमदापहनिशितवीक्षित
नतजनावनसकरुणेक्षित
यतिपतिप्रतिभासमीक्षित
दररथाङ्गगदासिभासुर
करसरोरुहसंहृतासुर
भुवनरक्षाव्रतधुरीणः
भुवनमायाबन्धरीणः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

भक्ताभीप्सितपूरणैकनिरतं भक्तोपदाग्राहिणं
भक्तार्तोद्धरणाय वेङ्कटगिरिंप्राप्तं मुमुक्षुप्रियम् ।
व्यक्ताव्यक्तपरापरार्थघटनाव्यासक्त चित्तं स्वयं
व्यक्तं मञ्जुलमङ्गलाकृतिमहं पद्माधवं भावये ।।

कलिका

अपि च परमतपोबलज्ञानामलानन्दादिपूर्णं
सपदि जनतावनपरायणं निपुणता घनतावकीर्णं
अलितमालेन्दीवरातसिजलदजित्वरचारुसुषमं
विलयकाल चराचरात्मक विश्वसंहराणैकविषमं
गिरिशवत्सविरिञ्चिधेनुक्षीरधारापुष्टमूर्तिं
हरि गिरीशामरझरीसुरकरटि हिमरुचिजेतृकीर्तिं
रासकेलीनिरतवल्लवरमणि निकरोद्भासमानं
व्यासनारदभृगुपराशरवामदेवापास्यमानं

उत्कलिका

अभयमुद्रास्वस्तिकाञ्चित
सभयसंश्रितपालनाञ्चित
खिन्नजनतावनपरायण
सन्नतावनकृतितुरायण
नवनवोन्मेषत्विडञ्चित
रविसुतारसरागरञ्जित
नित्यनूतनचारुसुषमं
सत्यशिवसौन्दर्यसुषमम्

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

सत्यं यस्य विभासते मह इदं संसारमूलं यतो
नित्यं व्यक्तमसच्चिदप्यहरहो नेतुः परिद्योतते।
दैत्यध्वंसि च यच्चरित्रमसकृत् तैस्स्तूयते दैवतै-
स्सत्याख्येन च वेङ्कटाद्रिपतिना सङ्गच्छतां चित्सती ॥

कलिका

अपि च वकुलमालिका महोदयानुलालितेन
निपुणयतिपतिप्रतीतनिखिलभोगलालितेन
निगमचोरहननधातृनिगमदानतत्परेण
आगमकृतपयोधिमथनहवनकृतिधुरन्धरेण
बलकटीकृताचलोरुग्र भर्मनयनमारणेन
कलुषमदविरोधकुटिलकनककशिपुधारणेन
सकलसुरविरोधिबलिरसातलप्रयापकेन
सकलविकलकुपितकुपतिसन्ततिप्रमापकेन

उत्कलिका

क्रूरदशमुखादिहनन
घोरचेदिपादिखनन
दुष्टमतिविमोहदान
रुष्टयवनजनविशसन
कर्मसुव्रतैकतान
धर्मपालनैकतान
वेङ्कटाचलाधिपेन
पङ्कजासनाधिपेन

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

श्रीकल्याणगुणाकराय भुवनक्षेमङ्करप्रक्रिया-
व्याकोचत्करुणारसार्द्रहृदयव्यायोगपूर्णात्मने ।
पाकारिप्रमुखामरालिनिलयप्राज्यस्वराट्टालक
प्राकारायितविक्रमाय निखिलब्रह्माण्डनेत्रे नमः॥

कलिका

अपि च चन्द्रिकातपावहानुरूपलोचनाय
त्रपितहृदयनिचयकृतसुधारसाभिषेचनाय
स्वातिदूषिदोषिबाणबाहुनिवहभञ्जनाय
स्वातिभक्तिमुक्तिनिरतसदयहृदयरञ्जनाय
सकलनिगमसारभूतसत्यतत्त्वबोधकाय
सकलसुकलसूरिकुशलसरलसौख्यसाधकाय
भक्तवत्सलप्रपन्नपरमभोग्यविश्रुताय
शक्तियुक्तिभक्तिमुक्तिसक्तभक्तसंस्कृताय

उत्कलिका

परमयोगजगदुपाय
परहृतार्तजगदपाय
विततभुवनभरितमाय
विततसर्वधानपाय
सुखितसकलमुनिनिकाय
नखविदीर्णदनुजकाय
मत्तदितिजभेदनाय
सत्तमानुमोदनाय

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

श्रीमद्वेङ्कटनायकात् श्रुतिनुत श्रीकात् जगत्सम्भव–
स्थेमोज्जासनकारणात् सुमनसां श्रेयः पदप्रापकात्।
सीमातीत महोयशोबलतपश्श्रेयोदयायोदयात्
श्रीमान्यात् परमप्रपन्नरसिकात् सेव्यः परो नास्ति मे ।।

कलिका

अपि चोज्ज्वलमणिहारमनोज्ञात्
अपराजितविनुतामलसंज्ञात्
परमज्ञानैश्वर्यानन्दात्
परमकृपावितपण्डितबृन्दात्
परमव्योमविभासुररूपात्
परममुनीश प्रणिहतरूपात्
आमोदादिविहारविलोलात्
सामादिश्रुतिसन्नुतशीलात्

उत्कलिका

नतहितकामित
ततिपूरणरत
वरवरमुनिनुत
सुरपरिबृढनत
लीलामानुष
हेलापूरुष
जगतीपालात्
जगतीमूलात्

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठीविभक्तिः

माया यं न हि वेत्ति वेत्ति सुतरां माया स्वरूपञ्च यो
माया यं न हि सौति सौति किल यो मायां जगन्मोहिनीम् ।
मायावादवदा वदोपि न हि यन्मायामतिक्रामते
ध्येयस्यात्मनि वेङ्कटाचलपतेर्दिव्याङ्घ्रियुग्मं भजे ॥

कलिका

अपि च मूलदासहृदयहर्म्यनिरतविभ्रमस्य
कुपितकुमतिदितिजहरदकुण्ठितोग्रविक्रमस्य
विमलकमलदलविलोलविततदृग्रमारतस्य
समणिहारमकुटवलयचारुभाविभासितस्य
वनचरावगम्यरम्यमनुजवेषभूषितस्य
कनदुदारचारुहारि कम्रनम्रभाषितस्य
अखिलवाङ्मयप्रतिष्ठितात्मतत्वभासनस्य
निखिलपुरुषचित्तवृत्तिनिर्णिरोधशासनस्य

उत्कलिका

विदितनिगमसद्रहस्य
सदयमोदकृद्यशस्य
निजविभावकृतवयस्य
विजय,निखिलमुनिनमस्य-
मान, सवनसम्प्रशस्य
मानभक्तभावसस्य-
जलदनिभनिरीक्षणस्य
जलजविपुलवीक्षणस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

परमे यस्य विशालकुक्षिकुहरे ब्रह्माण्डभाण्डावली
सुरमार्गे जलदावली, जलनिधौ शुद्धोर्मिमालेव च ।
परिधिं यान्ति पुरस्तिरोभवमयं ब्रह्मादिमूले परे
वरदे वेङ्कटवल्लभे मम पराभक्तिस्समिन्धां सदा ।।

कलिका

अपि च विनतजनानुपालनविविधवेष विलासललिते
निपुणजडधनिनिस्वसमनिर्णिद्रनिजवात्सल्यकलिते
प्रकृतिसुन्दरमधुरबृन्दावनविनोदविमोदरसिके
विकृतिरहितासेचकनवरूपमोहितभवविरसके
मुरलिमधुरालापविवशितमुदितवल्लवरमणिहृदये
हरपितामहनिगममकुटाविदितविशदोदारहृदये
अरिचिरण्टीचिकुरतिमिरमदापहोज्ज्वलित प्रतापे
निरतिशयनिरपायनिरवधिनिरुपमानानवस्वरूपे

उत्कलिका

सुरवरानल यमनिशाचर
वरुणवायुकुबेरपुरहर
हिमकरार्यमधातृमुखसुर
समयताराबिन्धनाब्दर
धरणितेजोगगनशम्बर
हरिदचिच्चिन्मयचराचर
पूर्णरूपकलांशशालिनि
पूर्णरूपानन्दशीलिनि

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

नालं व्यालपतिर्दलानि हरितोऽनन्ताधरः कर्णिका
नीलाभ्रं भ्रमरोदयस्य सरितो निर्यन्मरन्दोद्गमाः।
नीलानाथ! समुद्धरन् कुवलयं नीराकराद्दंष्ट्रया
लीलाकोल! वृषाचलेश! रमसे लीलाविभूत्या सदा ।।

कलिका

अपि च वाराशिजाहारिरूपोल्लास
विपुलतेजोयशोवीर्यसारोल्लास
पद्मावतीहृदयपद्मवनकलहंस
शुद्धसात्त्विकरूप सिद्धादिदुरवाप
बद्धकृतसंतापविद्धतामसभूप
रासकेलीलोलदासपालनशील
व्यासनुतगुणजालभासितामलहेल

उत्कलिका

राधाहृदरविन्द
बाधाहरमिलिन्द
रदनापजितकुन्द
मदनतातमुकुन्द
भक्तजनमन्दार
मुक्तिमुखसिन्दूर
वेङ्कटाद्रिविहार
पङ्केजमणिहार

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

विश्वं यो विदधाति पाति तुदते वेदायमीशं विदुर्-
विश्वं येन सुधार्यतेऽभिदधते विश्वेपि यस्मै नमः।
शश्वद् यान्ति यतस्सुखं सुमनसस्स्वप्नं जगद्यस्य वा
विश्वं यत्र विभाति सत्वमव मां विष्णो वृषाद्रीश्वर ।।

वेङ्कटनायकगुणमणि-
खचितं सुवर्णमिदमनिशं जयतात् ।
विजयसारथिविरचितं
पण्डितहृदयाभरणमुदाहरणम् ।।

*****

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामानुजोदाहरणम्

मातृश्री गोपमाम्बाया आदेशात् विहितं मया ।
भगद्रामानुजोदाहरणं शरणं नृणाम् ।।

श्रीमन्नाथमुनि प्रकाशित विशिष्टाद्वैत सिद्धान्त सा -
म्राज्योद्धारक सार्वभौम जगदेकाचार्य विद्यानिधे ।
श्रीमद्यामुनदेशिकाशय गरीयस्ता प्रतिष्ठापना-
चार्य प्राकृत चेतनोद्धरण पारीण ब्रुवे स्वस्ति ते ।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाविभक्तिः

जयति भुवनदीपस्संहृतार्तानुतापः
नियमविधुतविकारो निश्चिताम्नायसारः।
प्रियवचनवितानः प्रीतसूरिप्रतानः
स्मयहरयतिवर्यस्स्वामिरामानुजार्यः।।

कलिका

अपि च वैदिकविपणिहीरः
नृपशुसंस्करणैकधीरः
परमसात्त्विकपथविहारः
चरमपदरतसाधुहारः
भवविकारविभ्रावदूरः
त्रिविधसंज्वरतिमिरसूरः
श्रुतिमनोहगरपरविचारः
श्रुतिशिरोमतकृतविचारः

उत्कलिका

चेतनोद्धर-
णातिमतिधर
शमदमाकर
समशिवङ्कर
यमिमनोहर
सुमतिभयहर
सुगतिसारः
प्रगतिकारः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

श्रीरामप्रियसेवैनकहृदयं श्रीकेशवार्यात्मजं
श्रीराजीवदळायताक्षमनघं श्रीरङ्गराजप्रियम् ।
श्रीरम्याकृतिमुज्ज्वलात्मचरितं श्रीभाष्यकारं गुरुं
श्रीरामानुजयोगिपुङ्गवमहं श्रीदेशिकेन्द्रं भजे ॥

कलिका

अपि च श्रुतिललनार्तिविदूरं
श्वपचमहीसुरसममतिसारं
काषायाम्बरवेषमनोज्ञं
दूषितनिगमविदूषिप्रज्ञं
तत्त्वमसि श्रुतितत्त्वाभिज्ञं
तत्त्वपरत्वध्यानोपज्ञं
श्रुतिहितसूक्तिव्रततिविकासं
कृतदुष्पथरतमतपरिहासम्

उत्कलिका

तत्त्वत्रयगुण
तत्त्वनिरूपण
तत्त्वविवेचन
तत्वनिबोधन
निपुणमहामति
विपुलमहस्तति
भासितमूर्तिं
भासुरकूर्तिम्

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

येनाकारि जगद्विकासकलितं येनैवपूतं जगत्
येनाम्नायगिरस्समन्वयुता येनोद्धृताः पामराः।
येनाद्वैतमतं विशेषसहितं येन प्रभुः पालितः
तेन श्रीयतिराजराजमणिना दीनोऽयमुज्जीव्यते।

कलिका

अपि च पूर्वसूरिहृदयहारिभूरिदर्शनेन
विपथरतविरुद्धवादविबुधवदनकर्षनेन
विषमजिनमतप्रवादविपिनदारुणानलेन
विषयलोलगुरमतद्रुनिलयभीषणालिनेन
कुपथपाशुपतमतादिकुधरनिकरपनिकरेण
चपलशङ्करप्रवादचटुतमो दिवाकरेण
दुरितनिरतसुगतविमतदुष्टभुजगगारुडेन
दुरितविरतवरदनिरतधरणिविबुधपरिबृढेन

उत्कलिका

कामरहितकर्मयोग
सीमरहितभक्तियोग
परमदास्यनिरतिभोग
चरमपदविशिष्टभोग
परिहतेषणार्तरोग
परिहृदार्तविविधरोग
दुष्टवादिभीकरेण
शिष्टवादिभीहरेण

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

चिदचिन्नाथ विशिष्टतत्त्वसुषमा जीवातवे सेतवे
मदमोहोग्रभवार्णवस्य भगवन्माया जगद्वेदिने ।
स्वदयोज्जीवितचेतनप्रततये सौहार्दवाराशये
मदमोहभ्रमभञ्जनाय यतिराण्मान्याय भूयो नमः॥

कलिका

अपि च रङ्गपुरराडभङ्गुरानुपमयोगबललालितात्मने
त्रिपुरषुस्मरपरत्वखण्डनत्रिपददर्शननिरूपणात्मने
परमवैष्णवपथप्रदर्शनप्रथिददर्शननिदर्शनाजुषे
वरदराजकरुणासुधारस प्रपुषितोपचितचिन्मयत्विषे
सकलवेदमतसारसङ्ग्रह प्रकटनाद्भुतयशोविहारिणे
विकटवादमतमत्तकोविदभ्रुकुटिमात्रपरिभूतिकारिणे
परमसूरिशठवैरियामुनप्रमुखदिव्यमतरीतिपोषिणे
चरमसूक्तिरतदासवासनापरिधिनिर्दलनधीरभाषिणे

उत्कलिका

चिदचिदीश्वरभिदावबोधन
प्रथितवेदविमतानुरोधन
प्रथितसारतरकीर्तिसुन्दर
व्यथितदुर्विधकुधीपुरन्दर
श्रुतिशिरोभिमतवादकोविद
द्युतिमहोमहितात्मसंविद
प्रकृतिजित्वरगभीरमूर्तये
प्रकृतिसुन्दरमनोज्ञमूर्तये ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

कुव्याख्यानशतैरपार्थघटकैः क्षुब्धा त्रयी भारती
दिव्यानन्दमुपागमत् यदुदयात् देवादिदेवो मुदम् ।
भव्यं प्राप विषादमीयुरवनौ पाषण्डषण्डाः परं
श्रीव्याख्यातृमणेस्समो यतिपतेस्सेव्योस्ति नः को गुरुः॥

कलिका

अपि च परंधामाश्रयकारात्
तपनीयोज्ज्वलदपघनरुचिरात्
यादवमिश्रकुमायादलनात्
यादवराजदयावहकलनात्
यवनतनूजाह्लादन लोलात्
अवनिजनोद्धरणाङ्कित शीलात्
स्वानुग्रहहृतसंसृतिबन्धात्
स्वानुग्रहकृतसंस्कृतिबन्धात्

उत्कलिका

जगदुज्जीवक
नगधरसेवक
नतजनतारक
दुरितनिवारक
श्रुतिमतभूषण
मितहितभाषण
जगदाभरणात्
अगतिकशरणात्

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठीविभक्तिः

चण्डालादिधरासुरान्तमखिलं संस्कारतोपीपवन्
मुण्डिक्षुद्रगुरुप्रभावमहरन् निर्मूलमुद्भूययः।
चण्डांशूद्भटतेजसाऽऽन्ध्यभरितं संसारमादीदपत्
पाण्डित्यप्रतिभानिधेर्यतिपतेः पादैकदासोस्म्यहम् ।।

कलिका

अपि च विषम विषयवादयन्तृतानिरोधकस्य
जपतपस्समाधियोग चरमलक्ष्यबोधकस्य
शारदा प्रदत्तभाष्यभारबिरुदराजितस्य
वारिजोदरैकदास्यभरितचित्सभाजितस्य
व्यासगुरुपरशारादिवचनचणविचक्षणस्य
वासुदेवपरपरार्धिदासहृदयरक्षणस्य
परमभक्ति- परमयोग- परमभोगभूषितस्य
परमशान्ति- परमदान्ति- परमकान्तितोषितस्य

उत्कलिका

ब्रह्मराक्षसप्रहरण
जिह्मगुरुमदापहरण
सुप्रसन्नसूरिशरण
सुप्रसन्नहृद्विहरण
करसमुज्ज्वलत्त्रिदण्ड
परमदेशिकप्रकाण्ड
त्रिभुवनैकतात्त्विकस्य
त्रिभुवनैकसात्त्विकस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

सदसद्वादविवादमोदमदिरास्वादावलिप्तात्मदु-
र्मदर्दुर्मोहकुदृक् कुवादजडिम भ्रान्त्यादि निर्मूलके।
चिदचिन्नाथ निरूपणव्रतरते श्रीनाथमोदावहे
मदनोन्मादहरे गुरौ यतिपतौ मद्भक्तिरस्त्वक्षता ।।

कलिका

अपि च परानन्दाञ्चिता चेतसि
कपटात्मकवनकाञ्चनरेतसि
शठरिपुभाषितसारज्ञातृरि
शठहठवादविशारदजेतरि
हरपरपामरपरिसंस्कर्तरि
हरिपरतापुनराविष्कर्तरि
अखिलाम्पायसमन्वयकर्तरि
निखिलागममतनिर्णयकर्तरि

उत्कलिका

घोराशाजल
मारोर्मीकुल
दारावर्तक
मारग्राहकु
मलझंझाजव
विलयीकृतभव
जलधिवहित्रे
कलुषलवित्रे

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

जय रामानुज देशिकेन्द्रसदयस्वान्तस्थितप्रज्ञ हे
जय काषायशिखोपवीतसुषमासारप्रसन्नाकृते ।
जय वेदान्तविवादनिर्णयपटो षड्दर्शनीतत्त्वविज्
जय संसारमरुस्थलामृतनिधे स्वामिन् त्रिलोकीगुरो।।

कलिका

अपि चार्तजनाह्लादविधायक
चपलपुरञ्जनसद्गतिदायक
संस्कारावलिसंस्कृतपामर
संस्कारोज्झितसौगतडामर
मायावादोन्मादनिरासक
श्रेयोवादविशेषविकासक
परमविशिष्टाद्वैतस्थापक
नरसंस्कृतिदुर्णयनिर्वापक

उत्कलिका

भारतभूषण
भारतपोषण
परमतखण्डन
हरिमतमण्डन
निगमशिरोनुत
सुगममतोद्यत
नतसुरभूमिज
यतिरामानुज

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

यतिराजो जगतीं पुनाति सुमनोहारं यतीन्द्रं भजे
यतिराजा श्रुतिरुद्धृता मम मनोयन्त्रे यतीन्द्रायते।
यतिराज श्रुतिसम्मतं मतमभूत् आनन्दमेति प्रजा
यतिराजो यतिराजि भान्ति सुगुणा आद्यायतीन्द्राव माम् ।।
श्रीरामानुज गुणमणि
निचितं सुवर्णमेतदनिशं जयतात् ।
विजयसारथिवरचितं
पण्डितहृदयाभरणमुदाहरणम् ।
यदि नाम सीसपद्यमुदाहरणप्रक्रियायामर्हति प्रयोक्तव्यतां, तदेदतस्मिन्
रामानुजोदाहरणे द्वितीयाविभक्तिस्थाने पाठकैस्समुपग्राह्यम् ।
हरिनियोगाज्जनोद्धरणाय रामानु-
जार्यरूपेणयस्त्ववततार
विपरीतमतजातमपमार्गगतवाद
निवहञ्च सपदियो नीरुरोध
आम्नायापाधोधिमवलोड्य सद्भाष्य-
ममृतसारं हारियश्चकार
मतजातिकुलभेदमतिगम्यमनुराज-
माबालगोपालमुपदिदेश
जगति मायाप्रवादमुत्सार्य निगम
निगदितं मतमेव यो निश्चिकाय
तमधिगुणमणिमञ्जुलममलचरित-
मादिशेषांशसम्भूतमानतोऽस्मि ।।

*****

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरघुनाथदेशिकोदाहरणम्

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमविभक्तिः

जेजेतात् रघुनाथदेशिकमणिस्सीतासतीवल्लभ–
स्ताताचार्यतपः फलायित महापुण्यावतारश्शुचिः।
श्रीभाष्यातिनिगूढतत्त्वविशदव्याख्यानवाचस्पतिः
प्रख्यातोपनिषद्विवेचननदीष्णश्शास्त्ररत्नाकरः॥

कलिका

अपिचोदग्रप्रतिभास्फूर्तिः
स्वपितृपितामहपावनकीर्तिः
श्रुतिवादप्रतिपन्ननिरुक्तिः
मतिमत्तोष्टुतवाचोयुक्तिः
परमार्थप्रतिजागरणोक्तिः
परमपद्रेप्सुप्रणिहितसक्तिः
विहितसमाश्रितबन्धविरक्तिः
सहजोदारविचारव्यक्तिः

उत्कलिका

स्तवनीयोत्तम
कविकुलसत्तम
श्रुतिहितनिजमत
विततावनरत
परमगुणाकर
परकरुणाकर
हरिरतहृदयः
परिणतमुदयः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयाविभक्तिः

श्रीमल्लोकगुरूत्तमेन विवृतं तत्त्वत्रयं यामुना-
चार्येणाप्युपपादितं श्रुतिमतं सिद्धित्रयं चोर्जयन् ।
यो रामानुजदर्शनं बहुमुखप्रज्ञाब्रडिम्नापरां
कोटिं लम्भयति स्तवीमि रघुनाथार्यं तमाप्तोत्तमम् ।।

कलिका

अपि च परमतवादकोविदमदविधूननपूर्णधिषणं
विपुलदर्शनशास्त्रसुनिशितवैदुषीपरिभूतधिषणं
द्विविधविज्ञानात्मावादविखण्डनाद्भुतयुक्तिनिरतं
त्रिविधसत्यत्वोपपत्तिश्रौततर्कोद्गानभरितं
मधुसुधारसमधुरिमाकरमञ्जुलोज्ज्वलफणितफणितं
मधुरकविभक्ताङ्घ्रिरेणुप्रमुमान्यमनोज्ञभणितं
बहुमुखीनाभ्यर्हितोन्नतबिरुदसुपुरस्कारहृद्यं
विहितबेल्लंकोण्डकद्वदवादखण्डनखण्डखाद्यम्

उत्कलिका

सकलशास्त्रकलाविशारद
विकलचातकनीलनीरद
निगमवादनसभाजनोद्यत
सुगतवादविधूननोद्यत
परमसत्वगुणैकबन्धुर
कविविपश्चिज्जिष्णुसिन्धुर
हरिपदाम्बोजातमत्तं
परिणितोन्नतपरमचित्तम्

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाविभक्तिः

समयस्फूर्तिदृशा महाबुधनुतप्रज्ञापटिम्ना तथा
बहुशास्त्रैकतलस्पृशा प्रतिभया सम्यग्विमर्शेन वा ।
भवता श्रीरघुनाथदेशिकमणे कस्स्पर्धते भारते
ध्वनिगम्भीरपदप्रचारकिवताकान्तारकण्ठीरव।।

कलिका

अपि च वेदबाह्यवादमत्तजयदुरन्धरेण
उपकृतात्मवादमधुरसूरिजनवसुन्धरेण
शठकुदृष्टिदुष्टमादविधुवनव्रतोद्यतेन
पिठरपीलुपाकवादिपरिभवत्प्रमोद्युतेन
परमसूरिसूक्तिसंपदेधनैकदीक्षितेन
परमपुरुषसहजसत्कृपाकटाक्षवीक्षितेन
सम्प्रदायरक्षिबहुविधप्रबंन्धसर्जनेन
सम्प्रदायदूषिवावदूकमुखविभर्जनेन ।

उत्कलिका

श्रीनिवासनामधेय
धीनिवासभागधेय
सत्यधर्मपूतहृदय
सत्यनिष्ठसान्तसदय
परममन्त्रजपपवित्र
दुरितदुर्लतालवित्र
ध्यानयोगनिष्ठितेन
ज्ञानभाक्प्रतिष्ठितेन

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थीविभक्तिः

कामार्थप्रवणा न धर्मविरतान् देहात्मचादोद्धतान्
धर्म्ये वर्त्मनि वर्तयन् प्रवचनैर्धर्मैकनिष्ठान् द्विधा।
भिन्नानन्यरताननन्यनिरतान् जागर्ति यो बोधयन्
तस्मै श्रीरघुनाथसूरिमणये भूयोऽपि भूयो नमः।।

कलिका

अपिच विमतख्यातिनिरसनोद्युक्ताय
अपहतांहोब्रह्मविद्याभिषिक्ताय
बहुवारकृतसूत्रभाष्यप्रवचनाय
बहुसदः कृतसूरिसूक्तिनिर्वचनाय
बहुविधांतेवासिनवरिवसितचरणाय
गृहयाम्यशिश्विदानार्चितचरणाय
श्रुतिवाग्रहस्यप्रकाशनस्फीताय
कृतिसमस्यापरिष्कारप्रभूताय

उत्कलिका (चतुर्थ्याभासः)

सर्वदा निरपाय
सर्वसुलभोपाय
मञ्जुलोज्ज्वलकाय
रञ्जितार्थिनिकाय
दलितहैतुकमाय
कलितनिस्सीमाय
महितस्वभावाय
सहजानुभावाय

 In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमीविभक्तिः

आर्तादीन् त्रिविधान् श्रियःपतिपरान् यश्चेतयन्नञ्जसा
कैवल्यैकपरायणान् परिमितस्वात्मानुभूत्येककान्।
उद्बोधैर्भगवत्प्रियानभिमुखीकर्तुं य ईष्टे बुध-
स्तस्मात् श्रीरघुनाथदेशिकमणेर्धन्योस्ति कोन्यो गुरुः।।

कलिका

अपि च निरीश्वरसाङ्ख्यकुठारात्
स्वपदाश्रितपरिपन्थिकठोरात्
संस्कृतभाषोद्धरणोदग्रात्
संस्कृतनिर्मलसुगणसमग्रात्
प्रणिहितभगवल्लसदनुबन्धात्
पणितोदात्तस्तुतिमणिबन्धात्
यामुनसूरिप्रतिनिधिभूतात्
कामदुराग्रहदूरीभूतात्

उत्कलिका

सूरिपुरन्दर
धीरधुरन्धर
सुकविसुधाकर
विकलकृपाकर
भवजनपोपुव
भवभयलोलुव
सुगुणमनोज्ञात्
सुगणविधिज्ञात्

In Public domain. Digitization Muthulakshmi Research Academy

षष्टीविभक्तिः

योयं श्रीपतिवादिभीकरमहासिंहस्य दर्पं हरन्
बेल्लंकोण्ड विपश्चिदुद्धतमहाहस्तावलेपान् लघु।
प्रोद्घुन्वन् प्रणिनाय युक्तिशतकैर्ग्रन्थाननेकान् महा-
सूरेश्श्रीरघुनाथदेशिकमणेः स्तोतुं गुणान् कः क्षमः।।

कलिका

अपि च सुश्रुतप्रकाशभाष्यबोधोनोत्सुकस्य
उपचितात्मनीनयोगभोग्यतमुभुत्सुकस्य
परिमितित्रयीविदूरपरमपुरुषबोधकस्य
परमसूरिहृदयदूरविमतरतनिरोधकस्य
कृष्णरायकृतिनिगूढतत्वसद्विवेचकस्य
विष्णुभक्तिपोतनार्यकृतिग्रन्थिमोचकस्य
पण्डितेन्द्रजगन्नाथकाव्यशास्त्रशोधकस्य
खण्डितत्रयीविदूषिदुर्मतप्रबोधकस्य

उत्कलिका

विदितपरकलारहस्य
विदितवेदितव्यशस्य
भिन्नजटिलदुस्समस्य
सन्नुतप्रभानिरस्य
मानकुमतिमत, विहस्य
मानदुरभिमावश्य
बहुबुभुक्षुसेवितस्य
बहुमुमुक्षुभावितस्य

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमीविभक्तिः

प्रस्थानत्रयतत्त्वबोधनमहाचार्ये प्रसन्ने परा
पश्यन्त्यादिचतुष्टयाञ्चितमहालक्ष्मीहयास्याश्रिते ।
न्यायव्याकरणादिदर्शनमहादर्शे गुरूणां गुरौ
श्रीवात्स्ये रघुनाथदेशिकमणाविन्धे परा शेमुषी ।।

कलिका

अपि च नल्लान् चक्रवर्तुल संज्ञितान्वयमणिललाये
अपहतान्तररातिपरमात्मानुभूतिरसाभिरामे
चेतनाचेतनविशिष्टब्रह्मतत्वसमैक्यबोधिनि
हैतुकौतुप्रतिवृषध्वजिखलदुराशयमर्मभेदिनि
परमरामायणनिगूढरहस्यविवरणधीप्रभावे
चरमवेदशिखोज्ज्वलद्युतिदीपनायत्तानुभावे
अर्थपञ्चकतत्वसम्यग् ज्ञानसंस्कृतशिष्यवर्गे
सार्थित श्रीनाथयामुनसूपपादितभक्तिमार्गे

उत्कलिका

अखिलविबुधादृतसदाशय
निखिलकविबुधसेविताश्रय
निशितसमयस्फूर्तिभूषित
विशदविशदोदात्तभाषित
परमसत्वविभूतिभासुर
चरणमूलावाप्तभूसुर
विमलवैष्णवसमयसीमनि
कमललोचनभक्तिभूमनि

In Public domain. Digitization Muthulakshmi Research Academy

सम्बोधनप्रथमाविभक्तिः

भोग्यं नानाविकारास्पदमचिदमितं स्वामिलीलैकपात्रं
धार्यश्शेषोनियम्यो बहुविधफलभुक्चेतनोज्ञोल्पमात्रः।
धर्तोद्धर्तानियन्ता बहुविधफलदस्सर्वशेषिशितेति
स्पष्टं व्याख्यातितत्त्वं त्रिविधमपि भवान् सद्गुरोजेजयीतु।।

कलिका

अपिचात्मामलगुणमणिभाजन
उपनिषदुत्सुककृतनीराजन
त्रिविधश्रुतिपरमार्थद्योतन
विविधभ्रमसन्तमसनिशातन
अद्वैतानुपपत्तिनिरूपण
स्याद्वादोद्धतमतनिर्वापण
भगवद्विषयप्रवचनरञ्जन
भगवद्दूषणपरमुखभञ्जन

उत्कलिका

द्विविधद्रव्य वि-
चारविचक्षण
द्विविधबुभुक्षू-
द्धरणकृपेक्षण
अभिनवरामा-
नुज गुरुसत्तम
शुभसद्गुणरघु-
नाथ बुधोत्तम

In Public domain. Digitization Muthulakshmi Research Academy

सार्वविभक्तिकम्

रघुनाथो जनतां पुनाति रघुनाथार्यं स्तुवे वैष्णवं
रघुनाथेन समुद्धृतञ्च रघुनाथार्याय भूयोनमः।
रघुनाथान्नगुरुः परोऽस्ति रघुनार्थार्यस्य नंतास्म्यहं
रघुनाथे सुगुणा विभान्ति रघुनाथाचार्यमौले जय।।

नामाङ्कितम्

श्रीरघुनाथसुगुणमणि
खचितं सुवर्णमेतदनिशं जयतात्।
विजयसारथिविरचितं
पण्डितहृदयाभरणमुदाहरणम् ।।

*****

In Public domain. Digitization Muthulakshmi Research Academy

उदाहरणकाव्यलक्षणानि

लक्षणदीपिका – गौरन (तेलुगु आलङ्कारिकः)

(1) गौरनलक्षणदीपिकायाम् उदाहरणकाव्यलक्षणानि तृतीयप्रकाशे, एवं चतुर्थप्रकाशे च निरूपिताः।

ओजः कान्तिगुणोपेतैः गौडरीतिसमन्वितैः।
अष्टभिः कथितैः पद्यैः कलिकोत्कलिकाक्रमैः।।

पद्येन नवमेनान्ते हृद्यं सर्वविभक्तितः।
जयेत्युपक्रमं पूर्वैरुदाहरणमुच्यते।।

अत्र सर्वाणि पद्यानि नेतृनामाङ्कितानि च ।
शक्वर्यादीनि बद्धानि मालिनीवृत्तमादिमम् ।। तृतीयप्रकाशः

अथोदाहरणादीनामुद्दिष्टानं यथाक्रमं।
लक्षणं क्रियते सम्यक्पूर्वाचार्यानुसारतः।।

यत्रादौ क्रियते पद्यं कलिकोत्कलिकादितः।
विभक्ति प्रथमं पश्चात् एवं सम्बोधनान्तिमा ।
द्वितीयाप्रमुखास्सप्त क्रमेण स्युर्विभक्तितः।
शक्वर्यादिमहाच्छन्दो निबन्धो यत्र दृश्यते।।

पद्ये पद्ये क्रमोपेत नेतृनामविभक्तियुक्।
जयेत्यादि पदोपेतं मालिनीवृत्तमादिमम् ।।

किञ्चाद्या वा विचार्या वा कलिकाष्टदला स्मृता।
कलिकातोद्यमात्रा वा किञ्चिदूनापि सोज्ज्वला ।।

विभक्त्याभाससंयुक्ता चतुर्था वा सुशोभना ।
भवेदुत्कलिकोपेता पूर्वोक्तां कास्यते उभे ।। पञ्चमप्रकाशः

उदाहरणमात्रस्य स्यादविभक्त्यष्टका यथा
संस्कृताद्यष्ट भाषाढ्य उदाहरणमातृका ।।

In Public domain. Digitization Muthulakshmi Research Academy

उदाहरणमात्रा स्यात् यथा सम्बुद्धिवर्जिता ।
तदा स्यात् श्लधरीनाम्ना सर्वत्र परितोषिता ।
उदाहरणमेवं स्यात् यदुत्कलिकया विना ।
कल्याणीति तदा नाम्ना विख्याता भुवनान्तरे
यदुदाहरणं ख्यातं भवेत्कलिकया विना ।
उत्फुल्लकमिति ख्यातं नाम्ना चाटुविशारदैः।।

प्रतापरुद्रीयम् – विद्यानाथः

(2) विद्यानाथग्रथिते प्रतापरुद्रीयालङ्कारिकग्रन्थे काव्यप्रकरणे
उदाहरणकाव्यलक्षणानि एवं प्रतिपादितानि।
अथ क्षुद्रप्रबन्धा निरूप्यन्ते
येन केनापि तालेन गद्यपद्यसमन्वितम्।
जयत्युपक्रमं मालिन्यादि प्रासविचित्रितम् ।काव्यप्रकरणे 73
तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ।। 74

यत्रादौ जयेत्युपक्रमं मालिन्यादिवृत्तं रम्यं पद्यं निबध्यते अनन्तरमपि चेत्युपक्रममाण अष्टौ वाक्यानि सप्रासानि सतालानि प्रतिविभक्ति निबध्यन्ते अनन्तरं विभक्त्याभासाः तदुहारणम्।

रत्नापनव्याख्यानम् – कुमारस्वामिसोमपीथी

अथ क्षुद्रप्रबन्धेषूदाहरणस्य लक्षणमाह– **येन केनेति** । तालेन चञ्चत्पुटादिना , गद्यैः, क्रमेण कलिकोत्कलिकापरपर्यायैर्विभक्तिविभक्त्याभासाङ्कितैर्वाक्यैः पद्यैः प्रतिवाक्यमादौ तत्तद्वाक्यसमा–

नविभक्तिकनायकनामाङ्कितैः श्लोकैश्च समन्वितम् । मालिनी नाम वृत्तविशेषः। **ननमययुतेयं मालिनीभोगिलोकैः इति तल्लक्षणात् ।**

अत्र लक्षणस्य न्यूनत्वाद्वर्तमानपदानाञ्च सङ्कीर्णत्वादुभयं वारयन् व्याचष्टे– **यत्रेत्यादिना** अत्र सम्बोधनविभक्तिरष्टमी। प्रबन्धान्ते सर्वविभक्त्यङ्कितो नवमश्लोकश्चेत्यादिविशेषाणां साक्षिश्लोकाः। साहित्यचिन्तामणौ द्रष्टव्याः।अन्ते कविप्रबन्धनामाङ्कितं पद्यविशेषं कुर्यात्। तदुक्तं अन्तेऽनुष्टुभमार्या वा कविकृत्याख्यायान्विताम् । कुर्याच्चारुप्रबन्धनामयं साधरणो विधिः।।

In Public domain. Digitization Muthulakshmi Research Academy

अलङ्कारसङ्ग्रहः–अमृतानन्दयोगी

अथोदाहरणादीनां लक्षणं कथ्यतेऽधुना ।
कल्पनीयानि पद्यानि सप्त सप्तविभक्तिभिः।।
संम्बोधनात्मिका चान्ते विभक्तिस्त्वष्टमी भवेत् । अलङ्कारसङ्ग्रहः,

साहित्यकल्पद्रुमः

येन केनापि तालेन गद्यपद्यसमन्वितम् ।
जयेत्युपक्रमं मालिन्यादि प्रासविचित्रितम् ।
तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ।।

पदार्थदीपिका

शक्वर्यादिमहाच्छन्दोनिबद्धो योऽत्र दृश्यते।
हृद्यात्र रीतिर्गौडीया यत्र बन्धोऽतिबन्धुरः।।
ओजः प्रसाधनाश्शब्दाः।।
भवेयुर्यत्र नेतारस्सुरासुरमहीसुराः।
गुरवो लोकपालाश्च सामन्तास्सचिवादयः।।
अमुष्य नायकाः प्रोक्ताः देवा दैत्या महीसुराः।
गुरवः क्षोणिपालाश्च सामन्ताः सचिवादयः।।

अलङ्कारसङ्ग्रहः 11–17

नाट्यशास्त्रम् –भरतमुनिः

गुर्वादिरथ लघ्वादिर्युग्मस्सर्वलघुस्मृतः।
चतुर्मात्रागणा ज्ञेयाः पूर्वच्छन्दोविकल्पनाः।।
पातोऽर्थकलितान् पातान् कुर्याल्लघ्वक्षरेषु च ।
गुर्वक्षरे तालगीतपातास्तु कलिका स्मृताः।।

नाट्यशास्त्रम् 31– 317,18 श्लोकाः।

In Public domain. Digitization Muthulakshmi Research Academy

अलङ्कारसङ्ग्रहः

अथोदाहरणादीनां लक्षणं कथ्यतेऽधुना।
कल्पनीयानि पद्यानि सप्त सप्तविभक्तिभिः।।

सम्बोधनात्मिका चान्ते विभक्तेष्वष्टमी भवेत् ।
शक्वरप्रभृतीनि स्युच्छन्दांस्यस्य यथा रुचि ।।

रीतिः प्रधाना गौडीया गतिःस्याद्द्रुतमध्यमा ।
ओजः प्रसाधनाशब्दाः सानुप्रासाः क्वचित्क्वचित् ।।

विभक्तिघटना चात्र यथा कामं क्रमेण वा ।
तत्राद्यं मालिनीवृत्तं जयेत्यादिसमन्वितम् ।।
गद्यात्मकदलान्यष्टौ प्रत्येकं सयतीनि च ।।

अन्ते तूत्कलिका कार्या समस्तैकपदात्मिका ।
अन्ते पद्यसमायुक्ता यत्यनुप्रासशोभिनी ।।

चतुरुत्कलिका स्याद्वा विभक्त्याभासालाञ्छिता ।
कलिकोत्कलिकामृष्टनव्यताललयक्रमा ।।
प्रतिपद्यं भवेन्नेतृ नाम तत्तद्विभक्तिमत् ।।

विभक्तिघटना चात्र यथाकामं क्रमेण वा ।

अलङ्कारसङ्ग्रहे एकादशतरङ्गे 6–12 श्लोकाः

वामनः– काव्यालङ्कारसूत्राणि

गद्यं वृत्तग्रन्धि चूर्णमुत्कलिकाप्रायं च । 1–3–22
पद्यभागवत्वृत्तगन्धि। 23
अनाविद्धललितपदं चूर्णम् ।। 24
विपरीतमुत्कलिकाप्रायम् । 25
अस्य भागस्य गोपेन्द्रतिप्पभूपालस्य कामधेनुव्याख्या एवं वर्तते ।

In Public domain. Digitization Muthulakshmi Research Academy

उत्कलिकाप्रायमिति–उत्कलिकोत्कण्ठा। "उत्कण्ठोत्कलिके समे" इत्यमरः। उत्कलिकायाः प्रायः प्रयोगबाहुल्यम् यस्मिंस्तत् उत्कलिकाप्रायं गद्यम् ।यस्मिन् श्रूयमाणे श्रोत्रूणामुत्कण्ठा बहुला भवतीत्यर्थः। कलिकाशब्दोऽत्र लक्षणया रुहरुहिकायां वर्तते। उल्लसन्तीं कलिकां रुहरुहिकां प्रैति प्राप्नोतीत्युत्कलिकाप्रायम्। यत्र पदसन्दर्भपरिपाटी काण्डोपकाण्ड सन्दोहशालिनी। कलिकेवोल्लसति तदुत्कलिका प्रायमित्यर्थः।।

उदाहरणकाव्यभेदाः

उदाहरणकाव्यस्य केचन नामान्यप्युक्तानि अलङ्गारसङ्ग्रहादि ग्रन्थेषु

अड्डुली – विभक्तिसप्तकयुता सन्ध्याचैव विना कृता ।
अड्डुलीति समाख्याता सद्भिश्चाटुविशारदैः।।
अलङ्कारसङ्ग्रहे एकादशतरङ्गे 18

कल्याणी – केवलं कलिकासङ्गात्कल्याणीति निगद्यते ।
यस्यास्तूत्कलिकास्थाने केवलार्या प्रयुज्यते ।
अलङ्कारसङ्ग्रहे एकादशतरङ्गे 19

उत्फुल्लकवती – केवलोत्कलिकासङ्गादुत्फुल्लकवती भवेत् ।
अलङ्कारसङ्ग्रहे एकादशतरङ्गे 20
यदुदाहरणं ख्यातं भवेत्कलिकया विना ।
उत्फुल्लकमिति प्रोक्तं नाम्ना चाटुविशारदैः।। प्रबन्धदीपिका

फलोदाहरणम् – सा फलोदाहरणं वा स्यादार्यासङ्गान्न भिद्यते ।।
अलङ्कारसङ्ग्रहे एकादशतरङ्गे 21
एषैव गद्यरहिता नवमाणिक्यमालिका ,
एषैव च त्रिगुणिता भवेन्नक्षत्रमालिका ।।
अलङ्कारसङ्ग्रहे एकादशतरङ्गे 24,25

In Public domain. Digitization Muthulakshmi Research Academy

विभक्तिनामानि

केवला प्रथमा वाणी द्वितीया केवला झरी ।
तृतीया केवला वापी चतुर्थी केवला फणी ।।
पञ्चमी केवला सारी षष्ठी मोरीति कथ्यते ।
सप्तमी खलिका प्रोक्ता सम्बुद्धिः सरसावती ।।
भिन्नैर्वर्णैर्भिन्ननामसम्भवे च तथा भवेत्।
सर्ववाक्यं च कर्तव्यं कविनायकलाञ्छितम् ।।

अलङ्कारसङ्ग्रहः 11:21-24

विभक्त्यधिदेवाताः

विराजन्ती कीर्तिमती सुभगा भोगमालिनी
कलावती कान्तिमती कमला जयवत्यपि ।
एता विभक्त्यधिष्ठात्र्यो देवाताः कथिता बुधैः।।

अलङ्कारसङ्ग्रहः 11:13,14

*****

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN – 978-93-80171-63-0

SANSKRIT ACADEMY
(ADARSHA SHODHA SAMSTHA)
Osmania University, Hyderabad-07
Phone & Fax: 040-27070281
Website: www.sanskritacademy.ac.in
Email: sanskritcademyhyde@gmail.com